ISSN : 975-2676

वर्षम्-११

अङ्काः-३८-३९

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५२४२ वैक्रमाब्दः २०७४-७५ अश्विन शुक्ल १२ - चैत्र शुक्ल १५ शकः १९३९-४० अक्टूबर २०१७ - मार्च २०१८

## कुलपतिवाक्

**आत्मना विन्दते वीर्यम्।** (केन २.४)

उपदिशति केनोपनिषत्। क्रान्तदर्शिनाम् अस्माकं पूर्वजानां सङ्कल्पं स्मरेम। तपसा असाध्यं नास्ति। तर्हि तपो नाम किम्? इति जिज्ञासायां कर्मभूमौ लब्धजन्मनः प्रत्येकं कर्तव्यमेव तपः, कार्यक्षेत्रे प्रत्येकोऽपि स्वीयं लक्ष्यं साधयितुं श्रद्धया यद्यदाचरति तत्तप इति। ऋषि-ऋणं मनसि निधाय संस्कृतक्षेत्रे कार्यरताः वयं कायेन मनसा वाचा तपश्चरेम। सत्स्वपि प्रतिबन्धकेषु विघ्नततिम् अविगणय्य आत्मबलेन यथाशक्ति प्रवर्तेम। तदिदम् अस्माकं तप इति कल्पयेम।

**इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति।** (अथर्व. २०.१९.३)

(देवता पुरूषार्थी को चाहते हैं, आलसी को नहीं।) इति अथर्वमन्त्रः प्रथते। प्रयत्नशीलाः कर्मपरायणाः संस्कृतमनस्का वयं साहसेन देवान् नायकान् उपसर्पेम। सम्प्रीताः देवाः नेतारः राष्ट्रहितं धरन्तः विकृतीः दूरीकुर्युः इति चिन्तयेम।

**नेतार ऊ षुणासिरः** (ऋ. १०.१२६.६)

(विकृतियों को दूर करें) इत्यस्तु ऋग्वेदमन्त्रप्रेरितः सङ्कल्पः। समाजस्य हिताय राष्ट्रस्य क्षेमाय मानवकुलस्य अभ्युत्थानाय धीराः वयम् अग्रेसरेम। 'विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः' इति सुभाषितम् अस्मान् प्रेरयतु।

संस्कृतशिक्षायां प्रवर्तमानाः वयं शिष्याः आचार्याः कर्मकराः च नूतनसत्रे संस्कृतस्य कृते स्वकीयं स्वप्नं साक्षात्कर्तुं शिक्षणकार्यं सफलीकर्तुं प्रतिबद्धाः भवेम। अध्ययनम् अध्यापनं मार्गदर्शनं चेति त्रितयं तद्धि तपः तद्धि तपः इति भावयन्तः सम्भूय प्रवर्तेम। पवित्रं संस्कृतकर्मव्रतं पालयन्तः सत्कर्मनिरताः सन्तः मनीषिणो वयं धीराः स्वकीयं कर्म पवित्रयितुं प्रयतिष्यामहे।

**पुनन्ति धीरा अपसो मनीष।** (ऋ. ३.९.५)

(बुद्धिमान व्यक्ति सत्कर्म करते हुए बुद्धि द्वारा कर्मों को पवित्र करते हैं।)

इत्याशयेन मङ्गलं कामये।

*–परमेश्वरनारायणशास्त्री*



नाट्यमहोत्सवस्य उद्घाटनं विदधानः अतिथिगणः



त्रिपुराराज्यस्य माननीयराज्यपालानां प्रो. तथागतरायवर्याणां सम्माननं विदधानः कुलसचिववर्यः




युवमहोत्सवे सभां सम्बोधयति कुलपतिवर्यः

**मुख्यपरामर्शदाता**
प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**
प्रो. सुब्रह्मण्यशर्मा
प्रो. मनोजकुमारमिश्रः
प्रो. सुकान्तकुमारसेनापतिः

**सम्पादकः**
डा. मधुकेश्वरभट्टः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायं, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु- **samskritavarta@gmail.com**

संस्थानस्य जालपुटेऽपि संस्कृतवार्ता द्रष्टुं शक्यते- **www.sanskrit.nic.in**

**संस्कृतवार्ता**
राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्
**ISSN : 975-2676**

प्रकाशकः
**कुलसचिवः**
**राष्ट्रियसंस्कृतसंस्थानम्**
(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः, भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058
011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

## सतर्कताजागरूकतासप्ताहस्य राष्ट्रियैकतादिवसस्य समाचरणम्

भारतसर्वकारस्य आदेशानुसारं राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये सतर्कता-जागरूकतासप्ताहस्य राष्ट्रियैकतादिवसस्य समाचरणम् अभवत्। सप्ताहमुपलक्ष्य कर्मचारिभ्यः विविधस्पर्धाः समायोजिताः। सतर्कताजागरूकताशपथं तथा राष्ट्रियैकता शपथं च सर्वैः अधिकारिभिः कर्मचारिभिश्च स्व्यकारि।



सतर्कताजागरूकतासप्ताहाचरणस्य दृश्यम्

## गणतन्त्रदिवससमाचरणम्

गणतन्त्रदिवसमुपलक्ष्य राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः रमेश्वरनारायणशास्त्रिवर्यः ध्वजोत्तोलनम् अकार्षीत्। भारतदेशस्य अखण्डतायाः संस्कृतेश्च रक्षणायै संभूय कार्यं कर्तव्यमिति संदेशं प्रादात्। संदर्भेस्मिन् संस्थानस्य कुलसचिवः आचार्यः एस्. सुब्रह्मण्यशर्मवर्यः, संस्थानस्य परीक्षानियन्त्रकः आचार्यः सुकान्तकुमार-सेनापतिवर्यः, अन्ये आचार्याः, कर्मचारिणश्च समुपस्थिता आसन्।





## अभिनन्दनम्

राष्ट्रियसंस्कृतसंस्थानस्य परियोजनाधिकारिरूपेण नियुक्तान् डॉ. मन्थाश्रीनिवासुमहोदयान् तथा उपनिदेशकरूपेण (शैक्षणिकविभागस्य) नियुक्तान् डॉ. देवानन्दशुक्लवर्यान् अभिनन्दति संस्थानपरिवारः।



डॉ. मन्थाश्रीनिवासु



डॉ. देवानन्दशुक्लः

## संपन्नः पञ्चदशः अन्तःपरिसरीयनाट्यमहोत्सवः




नाट्यमहोत्सवस्य उद्घाटनकार्यक्रमे मञ्चासीनाः अतिथयः

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् अन्तःपरिसरीयनाट्यमहोत्सवः समायोज्यते। ऐषमः पञ्चदशः अन्तःपरिसरीयनाट्यमहोत्सवः २१.११.२०१७ दिनाङ्कात् २४.११.२०१७ दिनाङ्कं यावत् राष्ट्रियसंस्कृतसंस्थानस्य अगरतलास्थे एकलव्यपरिसरे भव्यतया समपादि। राष्ट्रियसंस्कृतसंस्थानस्य देशस्य विविधप्रान्तेषु राजमानानां परिसराणां छात्रैः मनोहराणि संस्कृतनाटकानि अभ्यनीयन्त। अस्य संस्कृतनाट्यमहोत्सवस्य उद्घाटनकार्यक्रमः २१.११.२०१७ दिनाङ्के संपन्नः। उद्घाटनकार्यक्रमेऽस्मिन् मुख्यातिथित्वेन प्रसिद्धकविः संपूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः आचार्यः अभिराजराजेन्द्रमिश्रवर्यः, अध्यक्षत्वेन राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिमहोदयः च उपस्थितः अभूत्। प्रास्ताविकं विदधानः नाट्यहोत्सवस्य संयोजकः प्रो. रमाकान्त पाण्डेयमहोदयः अवोचत् यत् राष्ट्रियसंस्कृतसंस्थानेन प्राचीनानि नवीनानि नाटकानि मञ्चितानि अयम् उद्यमः केनापि विश्वविद्यालयेन न कृतः ऐदम्प्राथम्येन राष्ट्रियसंस्कृतसंस्थानेन विहितः इति। संपूर्णानन्दविश्वविद्यालयस्य कुलपतिचरः आचार्यः अभिराजराजेन्द्रमिश्रवर्यः संस्कृतरूपकाणि मानवेभ्यः सन्मार्गं दिशन्ति जीवनस्य लक्ष्यं च प्रदर्शयन्ति एवं संस्कृतभाषासामर्थ्यजननमपि नाटकस्य मुख्यं प्रयोजनं विद्यते। युवानः छात्राः नूतननाटकानां प्रयोगद्वारा अनुभवे नावीन्यं सम्पादयेयुः। रूपकाणाम् दर्शनेन अभिनयेन च संस्कृतभाषायाः उच्चारणशुद्धता भविष्यति। आधुनिकरूपकाणां प्रस्तुतेः इदं लक्ष्यं विद्यते यत् आधुनिकसमाजस्य परिस्थितिं जानीयुः आस्माकीनाः इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिमहोदयः अबूबुधत्।



अतिथमहोदयं सम्मानयति कुलपतिमहोदयः

ततः परं भोपालपरिसरीयच्छात्रैः पूर्वरङ्गं प्रस्तुतम्। पूर्वरङ्गे प्रस्तोष्यमाणनाटकानां विषयवस्तु न्यरूपि। वेदव्यासपरिसरस्य छात्रैः उदात्तराघवम्, श्रीरणवीरपरिसरस्य छात्रैः चैतन्यचन्द्रोदयम्, राजीवगान्धीपरिसरस्य छात्रैः सुभद्राधनञ्जयम्, एकलव्यपरिसरस्य छात्रैः राघवाभ्युदयम्, श्रीरघुनाथकीर्तिपरिसरस्य छात्रैः लक्ष्मीमानवेदम्, श्रीसदाशिवपरिसरस्य छात्रैः बाणहरणम्, लखनऊपरिसरस्य छात्रैः विख्यातविजयम्, गुरुवायूरपरिसरस्य छात्रैः सीताराघवम्, जयपुरपरिसरस्य छात्रैः किरातार्जुनीयव्यायोगः, क.जे. सोमैयासंस्कृतविद्यापीठस्य छात्रैः विवेकानन्दविजयम्, भोपालपरिसरस्य छात्रैः प्रेमपीयूषम् इति रूपकाणि अभ्यनीयन्त।

नाट्यमहोत्सवस्य समापनकार्यक्रमः २४.११.२०१७ दिनाङ्के संपन्नः। संपूर्तिसमारोहे मुख्यातिथिपदं गुजरातस्थअम्बेडकरविश्व- विद्यालयस्य कुलपतिः प्रो. पङ्कजजानिमहाभागः, अध्यक्षपदं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिवर्यः च अलमकार्षीत्। राष्ट्रियसंस्कृतसंस्थानेन अद्यावधि पञ्चाशतधिकैकशतं रूपकाणां प्रस्तुतिः विहिता इति अयं श्लाघनीयो विषयो विद्यते। अभिनीतनाटकेन आनन्दः संदेशश्च लब्ध इति प्रो. पङ्कजजानिमहाभागः अभिप्रैत्। अभिनयः अपि सरस्वत्याः आराधनं विद्यते। नाटकस्य दर्शनेन प्राप्तस्य नूतनानुभवेन अस्माकं दोषाणां परिमार्जनं कर्तुं शक्नुमः। इदंप्रथमतया संस्थानेन अयं नाट्यमहोत्सवः पूर्वोत्तरराज्योषु आयोजितो विद्यते। आयोजनस्य मुख्यं लक्ष्यं संस्कृतस्य प्रचारः प्रसारः च इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिवर्यः अवादीत्। राजीवगान्धीपरिसरस्य छात्रैः अभिनीतं सुभद्राधनञ्जयम् इति रूपकं प्रथमस्थानं, गुरुवायूरपरिसरस्य छात्रैः अभिनीतं सीताराघवम् इति रूपकं द्वितीयस्थानं, क.जे. सोमैयासंस्कृतविद्यापीठस्य छात्रैः अभिनीतं विवेकानन्दविजयम् इति रूपकं तृतीयस्थानं सान्त्वनापुरस्कारं एकलव्यपरिसरस्य छात्रैः अभिनीतं राघवाभ्युदयं च अवाप्नोत्।

### विजेतृनामानि

| | | | | |
|---|---|---|---|---|
| राहुल मिश्रा | लखनऊपरिसरः, लखनऊ | विख्यातविजयम् | धर्मराजः | प्रथमपुरस्कारः |
| विशाल कुमारः | लखनऊपरिसरः, लखनऊ | विख्यातविजयम् | कृष्णः | द्वितीयपुरस्कारः |
| दीनबन्धु पाण्डेयः | लखनऊपरिसरः, लखनऊ | विख्यातविजयम् | कर्णः | तृतीयपुरस्कारः |
| भावेश पाठकः | के.जे. सोमैय्यापरिसरः, मुम्बई | विवेकानन्दविजयम् | विवेकानन्दः | प्रथमपुरस्कारः |
| निलेश ढवळे | के.जे. सोमैय्यापरिसरः, मुम्बई | विवेकानन्दविजयम् | रामकृष्णः | द्वितीयपुरस्कारः |
| शकुन्तला पण्डा | के.जे. सोमैय्यापरिसरः, मुम्बई | विवेकानन्दविजयम् | शेफालिका | तृतीयपुरस्कारः |
| अनिल् एल्. | गुरुवायूरपरिसरः, केरलम् | सीताराघवम् | विश्वामित्रः, रावणः | प्रथमपुरस्कारः |
| शान्ती देवि | गुरुवायूरपरिसरः, केरलम् | सीताराघवम् | सीता | द्वितीयपुरस्कारः |
| अनु पि. एस्. | गुरुवायूरपरिसरः, केरलम् | सीताराघवम् | राघवः | तृतीयपुरस्कारः |



पूर्वरङ्गस्य एकं दृश्यम्

मुख्यालयवार्ता

| | | | | |
|---|---|---|---|---|
| विष्णुदास् के. एस् | गुरुवायूरपरिसरः, केरलम् | सीताराघवम् | दशरथः, परशुरामः, हनूमान् | तृतीयपुरस्कारः |
| गौरवः | वेदव्यासपरिसरः, बलाहरः | उदात्तराघवम् | रामः | प्रथमपुरस्कारः |
| जीवनलालः | वेदव्यासपरिसरः, बलाहरः | उदात्तराघवम् | रावणः | द्वितीयपुरस्कारः |
| केवलः | वेदव्यासपरिसरः, बलाहरः | उदात्तराघवम् | लक्ष्मणः | तृतीयपुरस्कारः |
| अरुण शर्मा | श्रीरणवीरपरिसरः, जम्मू | चैतन्यचन्द्रोदयम् | चौतन्य, कृष्णः | प्रथमपुरस्कारः |
| ऋषि कुमारः | श्रीरणवीरपरिसरः, जम्मू | चैतन्यचन्द्रोदयम् | कलिः | द्वितीयपुरस्कारः |
| अङ्कज शर्मा | श्रीरणवीरपरिसरः, जम्मू | चैतन्यचन्द्रोदयम् | सूत्रधारः | तृतीयपुरस्कारः |
| रोहितकुमारः | श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः | लक्ष्मीमानवेदम् | राजा मानवेदः | प्रथमपुरस्कारः |
| मुक्ता उपाध्यायः | श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः | लक्ष्मीमानवेदम् | राजलक्ष्मीः | द्वितीयपुरस्कारः |
| प्राचीनौटियालः | श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः | लक्ष्मीमानवेदम् | रत्नप्रभा | तृतीयपुरस्कारः |
| निहाररञ्जन रथः | सदाशिवपरिसरः, पुरी | बाणहरणम् | शकुनिः | प्रथमपुरस्कारः |
| सरस्वती गिरिः | सदाशिवपरिसरः, पुरी | बाणहरणम् | श्रीकृष्णः | द्वितीयपुरस्कारः |
| लक्ष्मण पाढी | सदाशिवपरिसरः, पुरी | बाणहरणम् | दुर्योधनः | तृतीयपुरस्कारः |
| आदित्य एच्.जि. | श्रीराजीवगांधीपरिसरः, शृङ्गेरी | सुभद्रा-धनञ्जयम् | कौण्डिन्यः | प्रथमपुरस्कारः |
| हरिप्रसादः एस्. | श्रीराजीवगांधीपरिसरः, शृङ्गेरी | सुभद्रा-धनञ्जयम् | धनञ्जयः | द्वितीयपुरस्कारः |
| गोपिका एस.के. | श्रीराजीवगांधीपरिसरः, शृङ्गेरी | सुभद्रा-धनञ्जयम् | सुभद्रा | तृतीयपुरस्कारः |
| कविता सिन्हा | एकलव्यपरिसरः, अगरतला | राघवाभ्युदयम् | सीता (नायिका) | प्रथमपुरस्कारः |
| विजय कृष्ण गोस्वामी | एकलव्यपरिसरः, अगरतला | राघवाभ्युदयम् | विदूषक एवं भिक्षु वेशधारी रावणः | द्वितीयपुरस्कारः |
| प्रियाङ्का शर्मा | एकलव्यपरिसरः, अगरतला | राघवाभ्युदयम् | नटी एवं शची | तृतीयपुरस्कारः |
| शिवनारायण महर्षिः | जयपुरपरिसरः, जयपुरम् | किरातार्जुनीयव्यायोगः | अर्जुनः | प्रथमपुरस्कारः |
| मयूर केवलिया | जयपुरपरिसरः, जयपुरम् | किरातार्जुनीयव्यायोगः | सिद्धादेशः | द्वितीयपुरस्कारः |
| रमेश कुमारः | जयपुरपरिसरः, जयपुरम् | किरातार्जुनीयव्यायोगः | हरकिरातः | तृतीयपुरस्कारः |
| धीरज नागरः | भोपालपरिसरः, भोपालम् | प्रेमपीयूषम् | भवभूतिः (नायकः) | प्रथमपुरस्कारः |
| प्रतिभा नलिनी जेना | भोपालपरिसरः, भोपालम् | प्रेमपीयूषम् | प्रियम्वदा (सखी) | द्वितीयपुरस्कारः |
| सौरभ शर्मा | भोपालपरिसरः, भोपालम् | प्रेमपीयूषम् | शबरः -१ | तृतीयपुरस्कारः |
| | सदाशिवपरिसरः, पुरी | बाणहरणम् | सर्वोत्तमाहार्यपुरस्कारः | |
| | एकलव्यपरिसरः, अगरतला | राघवाभ्युदयम् | सर्वोत्तमप्रकाशव्यवस्थापुरस्कारः | |
| | भोपालपरिसरः, भोपालम् | प्रेमपीयूषम् | सर्वोत्तमसंगीतपुरस्कारः | |
| | श्रीराजीवगांधीपरिसरः, शृङ्गेरी | सुभद्राधनञ्जयम् | सर्वोत्तममञ्चसज्जापुरस्कारः | |
| | गुरुवायूरपरिसरः, केरलम् | सीताराघवम् | सर्वोत्तमनिर्देशकपुरस्कारः | |
| शकुन्तला पण्डा | के.जे. सोमैय्यापरिसरः, मुम्बई | विवेकानन्दविजयम्, शेफालिका, सर्वोत्तमा अभिनेत्री | | |
| शिवनारायण महर्षिः | जयपुरपरिसरः, जयपुरम् | किरातार्जुनीयव्यायोगः, अर्जुनः, सर्वोत्तमः अभिनेता | | |










मुख्यालयवार्ता

## ५६तमी अखिलभारतीयशास्त्रीयस्पर्धा



दीपप्रज्ज्वालनं कुर्वन्तः महामहिमराज्यपालाः

राष्ट्रियसंस्कृतसंस्थानेन अधीतविद्यायाः दृढीकरणार्थं शास्त्ररक्षणार्थं च प्रतिवर्षम् अखिलभारतीयशास्त्रीयस्पर्धा भारतस्तरे आयोज्यते। ५६तमी अखिलभारतीयशास्त्रीयस्पर्धा अगरतलास्थे एकलव्यपरिसरे १८.०१.२०१८ तः २२.०१.२०१८ पर्यन्तं समायोजिता। कार्यक्रमस्य उद्घाटनं १८.०१.२०१८ दिनाङ्के संपन्ना। मुख्यातिथिपदं त्रिपुराराज्यस्य माननीयराज्यपालाः प्रो. तथागतरायवर्याः, अध्यक्षपदं राष्ट्रियसंस्कृत- संस्थानस्य कुलसचिवः प्रो. सुब्रह्मण्यशर्मवर्यश्च अलमाकार्षुः। महामहिमराज्यपालाः संस्कृतभाषा देवभाषा विद्यते, इयं भाषा अस्माकं संस्कृतिं जीवनस्य लक्ष्यं च प्रबोधयति इति अवादीत्। संस्थानस्य ध्येयवाक्यं विद्यते योनूचानः स नो महान् इति अनूचानशब्दस्य सततशास्त्राध्ययनतत्परः इत्यर्थः। संस्थानं शास्त्राध्यापनकर्म निरन्तरम् अनुतिष्ठति इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपसचिवः प्रो. सुब्रह्मण्यशर्मवर्यः अवदत्।




समापनकार्यक्रमे मञ्चासीनाः अतिथयः

अखिलभारतीयशास्त्रीयस्पर्धासु राज्यस्तरे चिताः २३ राज्येभ्यः समागताः ३०० अधिकाः प्रतिभागिनः सम्मिलिता अभूवन्। दशसु विषयेषु भाषणस्पर्धाः, अष्टसु शास्त्रेषु शलाकास्पर्धाः, कण्ठपाठस्पर्धाः, शास्त्रार्थस्पर्धा, समस्यापूर्तिस्पर्धा, अक्षरश्लोकिस्पर्धा चेत्याहत्य २६स्पर्धाः प्रावर्तन्त। प्रत्येकं स्पर्धासु विजयिनः प्रथम-द्वितीय-तृतीयपुरस्कारेण स्वर्ण-रजत-कांस्यपदकानि समाप्नुवन्। सर्वस्पर्धासु अधिकान् अङ्कान् अवाप्य कर्णाटकराज्यस्य स्पर्धालुगणः विजयवैजयन्त्या व्यभूषयत्।

अस्य कार्यक्रमस्य समापनसमारोहः २२.०१.२०१८ दिनाङ्के संपन्नः। कार्यक्रमे मुख्यातिथिरूपेण दरभङ्गास्थ-श्रीकामेश्वरसिंहसंस्कृतविश्वविद्यालयस्य कुलपतिचरः, सारस्वतातिथिरूपेण आचार्यः श्रीपादसुब्रह्मण्यवर्यः अध्यक्षरूपेण राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो.परमेश्वरनारायणशास्त्रिवर्यः च व्यभूषयन्। एते विजेतृभ्यः छात्रेभ्यः पुरस्कारं व्यतन्वन्।

### स्पर्धायां विजेतृनामानि

| स्पर्धानाम | नाम | परिणामः |
|---|---|---|
| व्याकरणभाषणम् | कार्तिकभाग्वत् | प्रथमस्थानम् |
| व्याकरणभाषणम् | प्रियव्रत दे. पाटील: | द्वितीयस्थानम् |
| व्याकरणभाषणम् | गौरवशर्मा | तृतीयस्थानम् |
| साहित्यभाषणम् | टि.के. कौशिकराव: | प्रथमस्थानम् |
| साहित्यभाषणम् | अभिषेककुमार: | द्वितीयस्थानम् |
| साहित्यभाषणम् | तन्मय प्र. हर्डीकर: | तृतीयस्थानम् |
| न्यायभाषणम् | भार्गवीसावईकर: | प्रथमस्थानम् |
| न्यायभाषणम् | वैष्णव: के.के. | द्वितीयस्थानम् |
| न्यायभाषणम् | शुभदीपदास: | तृतीयस्थानम् |
| साङ्ख्य-योगभाषणम् | रामकृष्णभट्ट: | प्रथमस्थानम् |
| साङ्ख्य-योगभाषणम् | जोषीआशिष: | द्वितीयस्थानम् |
| साङ्ख्य-योगभाषणम् | गौरप्रसादपण्डा | तृतीयस्थानम् |
| मीमांसाभाषणम् | श्रीगोपालशर्मा | प्रथमस्थानम् |
| मीमांसाभाषणम् | हरिणन् के.आर्. | द्वितीयस्थानम् |
| मीमांसाभाषणम् | एस्.एम्. प्रणव: | तृतीयस्थानम् |
| वेदान्तभाषणम् | प्रभञ्जनवायि | प्रथमस्थानम् |
| वेदान्तभाषणम् | के. मनोग्ना | द्वितीयस्थानम् |






मुख्यालयवार्ता

| | | |
|---|---|---|
| वेदान्तभाषणम् | मुनीषकुमारः | तृतीयस्थानम् |
| धर्मशास्त्रभाषणम् | ऐतरेय एल्.बि. भारद्वाजः | प्रथमस्थानम् |
| धर्मशास्त्रभाषणम् | अनन्यागिरिः | द्वितीयस्थानम् |
| धर्मशास्त्रभाषणम् | द्वारकेशवे | तृतीयस्थानम् |
| ज्योतिषभाषणम् | वादिराजतन्त्री | प्रथमस्थानम् |
| ज्योतिषभाषणम् | विघ्नेश अय्यरः | द्वितीयस्थानम् |
| ज्योतिषभाषणम् | जी. सागररेड्डी | तृतीयस्थानम् |
| जैन-बौद्धदर्शनभाषणम् | विपाशाजैनः | प्रथमस्थानम् |
| जैन-बौद्धदर्शनभाषणम् | कोण्डिअनिरुद्धराममूर्तिः | द्वितीयस्थानम् |
| जैन-बौद्धदर्शनभाषणम् | पंड्याः सावन | तृतीयस्थानम् |
| वेदभाष्यभाषणम् | प्रसादराजारामजोशी | प्रथमस्थानम् |
| वेदभाष्यभाषणम् | ब्रह्मानन्दझा | द्वितीयस्थानम् |
| वेदभाष्यभाषणम् | साधुसर्वमङ्गलदासः | तृतीयस्थानम् |
| साहित्यशलाकापरीक्षा | श्रीवल्ली म. हेगडे | प्रथमस्थानम् |
| साहित्यशलाकापरीक्षा | भट्टदेवाङ्गः | द्वितीयस्थानम् |
| साहित्यशलाकापरीक्षा | नकुल शर्मा | तृतीयस्थानम् |
| व्याकरणशलाकापरीक्षा | सरयू प्रफुल्लचन्द्रः | प्रथमस्थानम् |
| व्याकरणशलाकापरीक्षा | अंतरिक्ष अग्रवालः | द्वितीयस्थानम् |
| व्याकरणशलाकापरीक्षा | आन्द्रेय जहोरुल्को | तृतीयस्थानम् |
| न्यायशलाकापरीक्षा | अनुरागरायचूरः | द्वितीयस्थानम् |
| सिद्धान्तज्योतिषशलाकापरीक्षा | श्रीनिवासः | प्रथमस्थानम् |
| सिद्धान्तज्योतिषशलाकापरीक्षा | गुरुप्रसादभट्टः | द्वितीयस्थानम् |
| सिद्धान्तज्योतिषशलाकापरीक्षा | विनयकुमारपाण्डेयः | तृतीयस्थानम् |
| सिद्धान्तज्योतिषशलाकापरीक्षा | रामनारायणद्विवेदी | प्रथमश्रेणी |
| वेदान्तशलाकापरीक्षा | एम्.सायिकृष्णः | प्रथमस्थानम् |
| वेदान्तशलाकापरीक्षा | अथर्वः | द्वितीयस्थानम् |
| वेदान्तशलाकापरीक्षा | राधिका | तृतीयस्थानम् |
| वेदान्तशलाकापरीक्षा | साधुहरिनन्दनदासः | प्रथमश्रेणी |
| वेदान्तशलाकापरीक्षा | शुभङ्करदासः | प्रथमश्रेणी |
| पुराणेतिहासशलाकापरीक्षा | कु. ज्योतिः | प्रथमस्थानम् |
| पुराणेतिहासशलाकापरीक्षा | भोगायताः अजय | द्वितीयस्थानम् |
| पुराणेतिहासशलाकापरीक्षा | संगीता | तृतीयस्थानम् |
| मीमांसाशलाकापरीक्षा | मध्वेशभट् | प्रथमस्थानम् |
| शास्त्रार्थविचारः | दत्तानुभव्टेंगसे | प्रथमस्थानम् |
| शास्त्रार्थविचारः | स्कन्दकुमारशर्मा | द्वितीयस्थानम् |
| शास्त्रार्थविचारः | राहुलभट्टः | तृतीयस्थानम् |
| शास्त्रार्थविचारः | यशवन्तकुमारत्रिवेदी | विशिष्टश्रेणी |
| शास्त्रार्थविचारः | के.एस्. कृष्ण | प्रथमश्रेणी |
| काव्यकण्ठपाठः | गोतमशर्मा | प्रथमस्थानम् |
| काव्यकण्ठपाठः | उपाध्यायआदित्य | द्वितीयस्थानम् |
| काव्यकण्ठपाठः | कृष्णा | तृतीयस्थानम् |













| | | |
|---|---|---|
| काव्यकण्ठपाठः | शुभंकरकुमारः | विशिष्टश्रेणी |
| काव्यकण्ठपाठः | नरेन्द्रश्रीपादजोशी | विशिष्टश्रेणी |
| काव्यकण्ठपाठः | दीपश्रीनाथ | विशिष्टश्रेणी |
| अमरकोषकण्ठपाठः | स्नेहा | प्रथमस्थानम् |
| अमरकोषकण्ठपाठः | शुभमशर्मा | द्वितीयस्थानम् |
| अमरकोषकण्ठपाठः | महेत किशन एस्. | तृतीयस्थानम् |
| अमरकोषकण्ठपाठः | उज्ज्वलः | विशिष्टश्रेणी-१ |
| अमरकोषकण्ठपाठः | कैलाशः | विशिष्टश्रेणी-२ |
| अमरकोषकण्ठपाठः | ऋचा कुमारी | प्रथमश्रेणी |
| अष्टाध्यायीकण्ठपाठः | गौरी टी. | प्रथमस्थानम् |
| अष्टाध्यायीकण्ठपाठः | प्रज्ञा | द्वितीयस्थानम् |
| अष्टाध्यायीकण्ठपाठः | प्राची नौटियालः | तृतीयस्थानम् |
| अष्टाध्यायीकण्ठपाठः | अनीशशर्मा | विशिष्टश्रेणी |
| अष्टाध्यायीकण्ठपाठः | शिखाचन्द्रवंशी | विशिष्टश्रेणी |
| अष्टाध्यायीकण्ठपाठः | भानुप्रताप आर्यः | प्रथमश्रेणी |
| अष्टाध्यायीकण्ठपाठः | प्राची | प्रथमश्रेणी |
| धातुरूपकण्ठपाठः | महेश चिदम्बरभट्टः | प्रथमस्थानम् |
| धातुरूपकण्ठपाठः | तनुश्री | द्वितीयस्थानम् |
| धातुरूपकण्ठपाठः | रामचन्द्ररेग्मी | तृतीयस्थानम् |
| धातुरूपकण्ठपाठः | रञ्जना निखिलः | विशिष्टश्रेणी |
| धातुरूपकण्ठपाठः | शुभम पाठकः | विशिष्टश्रेणी |
| भगवद्गीताकण्ठपाठः | माधव आमशेकरः | प्रथमस्थानम् |
| भगवद्गीताकण्ठपाठः | आयुषी | द्वितीयस्थानम् |
| भगवद्गीताकण्ठपाठः | उमामहेश्वर रावः | तृतीयस्थानम् |
| भगवद्गीताकण्ठपाठः | नारायणः | विशिष्टश्रेणी |
| भगवद्गीताकण्ठपाठः | लोहितः टि. | प्रथमश्रेणी |
| भगवद्गीताकण्ठपाठः | लेखिका | प्रथमश्रेणी |
| समस्यापूर्तिः | ठाकरराजेशकुमारगोविन्दभाई | प्रथमस्थानम् |
| समस्यापूर्तिः | हृषीकेशः | द्वितीयस्थानम् |
| समस्यापूर्तिः | विघ्नेश अय्यरः | तृतीयस्थानम् |
| अक्षरश्लोकी | हरिहरः ए | प्रथमस्थानम् |
| अक्षरश्लोकी | महेता कुलदीपः | द्वितीयस्थानम् |
| अक्षरश्लोकी | मनीशकुमारपाण्डेय | तृतीयस्थानम् |
| शास्त्रीयस्फूर्तस्पर्धा | १. अरुणकुमारपाण्डेय | |
| | २. राहुलकुमारझा | प्रथमस्थानम् |
| शास्त्रीयस्फूर्तस्पर्धा | १. अंशुलकुमारदूबे | |
| | २. अश्वनीकुमारठाकूरः | द्वितीयस्थानम् |
| शास्त्रीयस्फूर्तस्पर्धा | १. अरविन्दनायकः | |













मुख्यालयवार्ता

## सोल्लासं संपन्नः दशमः अन्तःपरिसरीययुवमहोत्सवः

संस्थानस्य प्रतिष्ठास्पदं दशमः अन्तःपरिसरीययुवमहोत्सवः २०१८ वर्षस्य मार्चमासस्य अष्टमदिनाङ्कात् एकादशदिनाङ्कं यावत् राष्ट्रियसंस्कृतसंस्थानस्य मुम्बई-महानगरे विराजमानस्य क.जे. सोमैयासंस्कृतविद्यापीठपरिसरे उत्साहेन संपन्नः। युवमहोत्सवे आयोजितासु साहित्य-संगीत-कला-क्रीडास्पर्धासु संस्थानस्य परिसरीयाः छात्राः सोत्साहं भागम् अग्रहिषुः। अष्टमे दिनाङ्के प्रातः तत्तराज्यसांस्कृतिकवेषभूषणैः अलङ्कृतानां विविधराज्यैरागतानां परिसरीयच्छात्राणां सांस्कृतिकशोभायात्रा संपन्ना मान्यानां कुलपतीनाम् आचार्याणां परमेश्वरनारायणशास्त्रिवर्याणामाध्यक्ष्ये, परिसरप्राचार्याणाम् आचार्याणां सुदेशकुमारशर्मणां मार्गनिर्देशने विविधपरिसरीयप्राचार्याणामुपस्थितौ शोभायात्रा प्रवर्तिता। तदनु पूर्वाह्णे उद्घाटनसमारोहः, मान्यवराणां राष्ट्रियसंस्कृतसंस्थानस्य कुलपतीनाम् आचार्याणां परमेश्वरनारायणशास्त्रिवर्याणामाध्यक्ष्ये, तिरुपतिस्थस्य राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतीनाम् आचार्याणां वी. मुरलीधरशर्ममहोदयानां मुख्यातिथ्ये, सोमैयान्यासस्याध्यक्षाणां श्रीमतां समीरभाईशान्तिलाल-सोमैयामहाभागानां विशिष्टातिथ्ये परिसरप्राचार्य्याणाम् आचार्याणां सुदेशकुमारशर्मवर्याणां संयोजकत्वे युवमहोत्सवसञ्चालकानां डा. मधुकेश्वरभट्टवर्य्याणां कार्यक्रमसञ्चालनेन सम्भ्रमेण समभूत्।



युवमहोत्सवस्य उद्घाटनकार्यक्रमस्य एकं दृश्यम्




अतिथिमहोदयं सम्मानयन्तः कुलपतिवर्याः

तदनु दिनत्रयं बहवः स्पर्धाः समजायन्त। सांस्कृतिकस्पर्धासु एककसंगीत-शास्त्रीयगायन-वादन-नृत्याभिनयस्पर्धाः अवर्तन्त। एवमेव चित्रकलास्पर्धासु आशुचित्रण-व्यङ्ग्यचित्र-रङ्गवल्ली-निर्माणस्पर्धाः संपन्नाः। शैक्षिकस्पर्धासु सुभाषितकण्ठपाठ-आशुभाषण-संगणकीयसंस्कृतस्पर्धा-स्फूर्तिस्पर्धाः समभूवन्। एवं खो-खो, कबड्डी, हस्तकन्दुकम्, धावनम्, कूर्दनम्, योगासनम् इत्यादिस्पर्धाः समायोज्यन्त। अस्मिन् युवमहेत्सवे नूतनया शैक्षिकलघुचलनचित्रस्पर्धा आयोजिता। विविधस्पर्धानां निर्णायकरूपेण देशस्य प्रथितविद्वांसः भारतीयक्रीडाप्राधिकारस्य पदाधिकारिणः क्रीडानिर्णायकरूपेण समागुः।

एकादशे दिनाङ्के अपराह्णे पथसञ्चलनेन सह ध्वजावरोहणकार्यक्रमः सर्वेषां परिसराणां प्राचार्याणां, संयोजकानां, निर्णायकमण्डलिप्रमुखाणां, कुलपतीनाञ्चोपस्थितौ समजनि। तस्मिन् दिने समापनसमारोहः पुरस्कारवितरणकार्यक्रमश्च समायोजितः। कार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः मान्याः आचार्याः अर्कनाथचौधरीमहोदयाः विशिष्टातिथिरूपेण समुपस्थाय सर्वान् अन्वगृह्णन्। संस्थानस्य कुलपतयः आचार्याः परमेश्वरनारायणशास्त्रिवर्याः आध्यक्ष्यं निरवहन्। परिसरप्राचार्याः युवमहोत्सवसंयोजकाः आचार्याः सुदेशकुमारशर्ममहोदयाः सफलतया सम्पादितस्य कार्यक्रमस्यास्य सहकारं दत्तवद्भ्यः धन्यवादान्प्राचीकटन्। डा. सुन्दरराजन्महोदयाः, संस्थानस्य कुलपतिचराः आचार्याः ए.पि. सच्चिदानन्दमहोदयाश्च विजेतृभ्यः पुरस्कारवितरणं कृत्वा अन्वगृह्णन्। आयोजितासु स्पर्धासु अत्यधिकान् अङ्कान् अवाप्य गुरुवायूरपरिसरः विजयवैजयन्त्या व्यभूषयत्।

### विजयिनां सूची

| | स्पर्धानाम | तृतीयपुरस्कारः | द्वितीयपुरस्कारः | प्रथमपुरस्कारः |
|---|---|---|---|---|
| १. | सुभाषितकण्ठपाठः (बालकानाम्) | भास्कर बेनर्जी<br>एकलव्यपरिसरः | गौरवः<br>वेदव्यासपरिसरः | भट्ट देवांगः<br>जयपुरपरिसरः |
| २. | सुभाषितकण्ठपाठः (बालिकानाम्) | त्रिदला इ. जि.<br>राजीवगान्धीपरिसरः | शीतल<br>लखनऊपरिसरः | दुर्गा एस् नम्बूदिरिः<br>गुरुवायूरपरिसरः |
| ३. | स्फूर्तिस्पर्धा | मयोभव पाण्डेयः<br>आनन्द प्रकाश पाठकः<br>लखनऊपरिसरः | दीपक कुमार चौधरी,<br>अभिषेक कुमारः<br>जयपुरपरिसरः | कोण्डी अनिरुद्धः राममूर्ति,<br>मलय माइति<br>राजीवगान्धीपरिसरः |
| ४. | आशुभाषणम् | प्रवेश पंड्या<br>क. जे. सोमैयासंस्कृतविद्यापीठम् | सुदर्शन भट्टः<br>राजीवगान्धीपरिसरः | रवीन्द्रः<br>जयपुरपरिसरः |

| | | | |
|---|---|---|---|
| ५. अनुवादस्पर्धा (हिन्दीतः आङ्ग्लतः संस्कृतम्) | नीरज कुमारः<br>रघुनाथकीर्तिपरिसरः | सोहन आर्य<br>भोपालपरिसरः | योगिता दिलीप छत्रे<br>राजीवगान्धीपरिसरः |
| ६. गद्यरचना | ऐश्वर्य्या चौधुरी<br>एकलव्यपरिसरः | सदानन्दः<br>भोपालपरिसरः | योगिता दिलीप छत्रे<br>राजीवगान्धीपरिसरः |
| ७. पद्यरचना | दीपेन्द्र<br>श्रीरणवीरपरिसरः | विघ्नेश रामास्वामी अय्यरः<br>क.जे. सोमैयासंस्कृतविद्यापीठम्, | योगिता दिलीप छत्रे<br>राजीवगान्धीपरिसरः |
| ८. संस्कृतवार्तालेखनम् | सदानन्द<br>भोपालपरिसरः | योगिता दिलीप छत्रे<br>राजीवगान्धीपरिसरः | पतंजलि त्रिपाठी<br>लखनऊपरिसरः |
| ९. सङ्गणकीयसंस्कृतम् | ग्रीष्मा एम्.एस्.<br>गुरुवायूरपरिसरः | नवीन के. आर्.<br>राजीवगान्धीपरिसरः | केशव शर्मा<br>भोपालपरिसरः |
| १०. आशुचित्रणम् | जोशि सुमा सुब्राय<br>राजीवगान्धीपरिसरः | प्रसनजित् पतिः<br>एकलव्यपरिसरः | ज्योतिरंजन नन्द<br>सदाशिवपरिसरः |
| ११. व्यङ्ग्यचित्रम् | मोनालिसा प्रधानः<br>श्रीरणवीरपरिसरः | प्रसनजित् पतिः<br>एकलव्यपरिसरः | ज्योतिरंजन नन्द<br>सदाशिवपरिसरः |
| १२. शैक्षिक-लघुचलच्चित्रनिर्माणम् | विवेक खजूरिया हरिप्रसाद एस्.<br>श्रीरणवीरपरिसरः, राजीवगान्धीपरिसरः | अक्षय राज् टी.<br>गुरुवायूरपरिसरः | प्रियाङ्का शर्मा<br>एकलव्यपरिसरः |
| १३. रङ्गवल्ली | अरूप प्रधानः<br>एकलव्यपरिसरः | महेश्वरि हुल्लुर<br>राजीवगान्धीपरिसरः | सुनयना<br>भोपालपरिसरः |
| १४. एकक-संस्कृतगीतम् (बालकानाम्) | अंकित पाण्डेयः<br>लखनऊपरिसरः | गलील टि.<br>गुरुवायूरपरिसरः | अनिरुद्ध राममूर्तिः<br>राजीवगान्धीपरिसरः |
| १५. एकक-संस्कृतगीतम् (बालिकानाम्) | सोनाली शर्मा<br>जयपुरपरिसरः | के.ए. अपर्णा होळ्ळ<br>राजीवगान्धीपरिसरः | देविका दासः<br>गुरुवायूरपरिसरः |
| १६. एकक-शास्त्रीयगानम् | अंकित पाण्डेयः<br>लखनऊपरिसरः | कोण्डी अमृता राममूर्तिः<br>राजीवगान्धीपरिसरः | अरुन्धती वर्मा एन् के<br>गुरुवायूरपरिसरः |
| १७. समूहगानम् | १. गौरवः<br>२. अमरजितः<br>३. हिमांशु शर्मा<br>४. रौनिक शर्मा<br>५. स्वाती धीमान्<br>६. निशेश तोमरः<br>७. पारुलः<br>वेदव्यासपरिसरः | १. अश्वती पि वि<br>२. गायत्री अशोकः<br>३. अरुन्धती वर्मा एन् के.<br>४. गायत्री के<br>५. देविका दास्<br>६. इन्दिरा एन्.बि.<br>७. आतिरा बाबु<br>गुरुवायूरपरिसरः | १. जोशि सुमा सुब्राय<br>२. त्रिदला इ. जि.<br>३.कोण्डी अमृता राममूर्तिः<br>४. सौजन्य के. के.<br>५. काव्या बि. एम्.<br>६. ग्रीष्मा रै बि.<br>७. के.ए. अपर्णा होळ्ळ<br>राजीवगान्धीपरिसरः |
| १८. एकक-शास्त्रीयवादनम् | कोण्डी अनिरुद्ध राममूर्तिः<br>राजीवगान्धीपरिसरः | हृषिकेश्टि.एस्<br>गुरुवायूरपरिसरः | भास्कर काण्डपालः<br>लखनऊपरिसरः |







| | | | | |
|---|---|---|---|---|
| १९. | एकक-शास्त्रीयनृत्यम् | भाग्यश्री श्रीचंदन:<br>सदाशिवपरिसर: | प्रतीक्षा के.पि<br>गुरुवायूरपरिसर: | दीप्तीशकुमार शतपति:<br>राजीवगान्धीपरिसर: |
| २०. | सङ्घनृत्यम् | १. दीप्तीशकुमार शतपति:<br>२. कविता गणपति भट्ट:<br>३. त्रिदला इ. जि.<br>४. काव्या बि. एम्.<br>५. ग्रीष्मा रै बि.<br>६. अश्विनि पि. भट्ट:<br>राजीवगान्धीपरिसर: | १. सोनाली शर्मा<br>२. प्रियंका<br>३. अंजू कुमावत<br>४. मूरवी नेतरीवाल<br>५. मीनू रानी<br>६. चन्द्रकान्ता<br>७. आतिरा बाबु<br>जयपुरपरिसर: | १. शान्तीदेवी के.जे.<br>२. अश्वती वि<br>३. प्रतीक्षा के.पि<br>४. रेष्मा के<br>५. काव्या चन्द्रन्<br>६. सूर्यगायत्री. पि<br>गुरुवायूरपरिसर: |
| २१. | एकपात्राभिनय: | शिवनारायण महर्षि:<br>जयपुरपरिसर: | गलील टि<br>गुरुवायूरपरिसर: | हरिप्रसाद एस्.<br>राजीवगान्धीपरिसर: |
| २२. | योगासनम् (बालकानाम्) | तुषार शर्मा<br>जयपुरपरिसर: | महेश बाग्वार:<br>राजीवगान्धीपरिसर: | निशेश तोमर:<br>वेदव्यासपरिसर: |
| २३. | योगासनम् (बालिकानाम्) | विभा मिश्रा<br>वेदव्यासपरिसर: | मुन्नी कुमारी<br>जयपुरपरिसर: | प्रियंका<br>क.जे. सोमैयासंस्कृतविद्यापीठम् |
| २४. | १०० मीटरधावनम् (बालकानाम्) | श्रीप्रद एम् जोशी<br>राजीवगान्धीपरिसर: | दीपक कुमार दाश:<br>भोपालपरिसर: | रतीश् मोहनन्<br>गुरुवायूरपरिसर: |
| २५. | २०० मीटरधावनम् (बालकानाम्) | दीपक कुमार दाश:<br>भोपालपरिसर: | तरुण कुमार:<br>वेदव्यासपरिसर: | रतीश् मोहनन्<br>गुरुवायूरपरिसर: |
| २६. | ४०० मीटरधावनम् (बालकानाम्) | सल्मान् फारिश् एम्.टि<br>गुरुवायूरपरिसर: | श्रीप्रद एम् जोशी<br>राजीवगान्धीपरिसर: | तरुण कुमार:<br>वेदव्यासपरिसर: |
| २७. | ८०० मीटरधावनम् (बालकानाम्) | सल्मान् फारिश् एम्.टि<br>गुरुवायूरपरिसर: | श्रीप्रद तरुण कुमार:<br>वेदव्यासपरिसर: | चेतन गावंड<br>क.जे. सोमैयासंस्कृतविद्यापीठम् |
| २८. | १५०० मीटरधावनम् (बालकानाम्)<br>(एकमीलमितं धावनम्) | वेङ्कट्रमण गणपति हेब्बार:<br>राजीवगान्धीपरिसर: | मनीष पन्त:<br>रघुनाथकीर्तिपरिसर: | तरुण कुमार:<br>वेदव्यासपरिसर: |
| २९. | १०० मीटरधावनम् (बालिकानाम्) | हरिप्रिय आ. कुलकर्णी<br>राजीवगान्धीपरिसर: | शोभिता एम्<br>गुरुवायूरपरिसर: | अंकिता मीणा<br>जयपुरपरिसर: |
| ३०. | २०० मीटरधावनम् (बालिकानाम्) | श्रीलक्ष्मी एम्. भट्<br>राजीवगान्धीपरिसर: | सपना देवी<br>वेदव्यासपरिसर: | अंकिता मीणा<br>जयपुरपरिसर: |
| ३१. | ४०० मीटरधावनम् (बालिकानाम्) | उर्मिला देवी<br>वेदव्यासपरिसर: | वन्दिता प्रियदर्शनी राउत<br>भोपालपरिसर: | अंकिता मीणा<br>जयपुरपरिसर: |
| ३२. | दीर्घकूर्दनम् (बालकानाम्) | अंकित कुमार शर्मा<br>जयपुरपरिसर: | श्रीप्रद एम् जोशी<br>राजीवगान्धीपरिसर: | रतीश् मोहनन्<br>गुरुवायूरपरिसर: |
| ३३. | दीर्घकूर्दनम् (बालिकानाम्) | काजल शर्मा<br>वेदव्यासपरिसर: | माधुरी मल्लिक:<br>भोपालपरिसर: | पूजा शर्मा<br>जयपुरपरिसर: |
| ३४. | उच्चकूर्दनम् (बालकानाम्) | अंकित कुमार शर्मा<br>जयपुरपरिसर: | श्रीप्रद एम् जोशी<br>राजीवगान्धीपरिसर: | बिबिन मोहनन्<br>गुरुवायूरपरिसर: |
| ३५. | उच्चकूर्दनम् (बालिकानाम्) | आतिरा ए<br>गुरुवायूरपरिसर: | शकुंतला पंडा<br>क. जे. सोमैयासंस्कृतविद्यापीठम् | काजल शर्मा<br>वेदव्यासपरिसर: |
| ३६. | गोलक्षेपणम् (बालकानाम्) | प्रदीप चन्द्र:<br>लखनऊपरिसर: | सुजिन् वि<br>गुरुवायूरपरिसर: | कमलेश कुमार सैनी<br>जयपुरपरिसर: |

| | | | | |
|---|---|---|---|---|
| ३७. | गोलक्षेपणम् (बालिकानाम्) | शैलेशः<br>जयपुरपरिसरः | नित्या के.एस्.<br>गुरुवायूरपरिसरः | प्रिया बरियालः<br>वेदव्यासपरिसरः |
| ३८. | चक्रक्षेपणम् (बालकानाम्) | राहुल भार्गवः<br>भोपालपरिसरः | प्रदीप चन्द्रः<br>लखनऊपरिसरः | पंकज शर्मा<br>वेदव्यासपरिसरः |
| ३९. | चक्रक्षेपणम् (बालिकानाम्) | रूपालीता बारिक<br>क. जे. सोमैयासंस्कृतविद्यापीठम् | राजलक्ष्मी मिश्रः<br>श्रीरणवीरपरिसरः | प्रिया बरियाल<br>वेदव्यासपरिसरः |
| ४०. | बैड्मिण्टन् एककम् (बालकानाम्) | दीपज्योति देब, गुरुवायूरपरिसरः | | अन्शुल लवनियाँ, जयपुरपरिसरः |
| ४१. | बैड्मिण्टन् युगलम् (बालकानाम्) | मनीष कुमार तिवारी, सोमदेव<br>लखनऊपरिसरः | | श्रीराज् पि.आ., दीपज्योति देब<br>गुरुवायूरपरिसरः |
| ४२. | बैड्मिण्टन् एककम् (बालिकानाम्) | रितू कुमारी, जयपुरपरिसरः | | सेतुलक्ष्मी पि. एस्., गुरुवायूरपरिसरः |
| ४३. | बैड्मिण्टन् युगलम् (बालिकानाम्) | रितू कुमारी, चन्द्रकान्ता,<br>जयपुरपरिसरः | | सेतुलक्ष्मी पि. एस्., अनु पि.एस्.<br>गुरुवायूरपरिसरः |
| ४४. | हस्तकन्दुकस्पर्धा<br>(केवलं बालकानाम्) | १. संतोष कुमार बारीक ५. बिकाश कुमार भोई<br>२. बिश्वजीत बेहेरा ६. सरोज कुमार पढीयारी<br>३. रविशंकर पाण्डेय ७. श्याम किशोर पाण्डेय<br>४. चन्द्रमा पौडयाल<br>क. जे. सोमैयासंस्कृतविद्यापीठम् | १. हरीश शर्मा ५. भुवन शर्मा<br>२. अर्जुनदेव सिंह ६. विशाल शर्मा अनिल<br>३. विवेक खजूरिया ७. शर्मा<br>४. रमन शर्मा<br>श्रीरणवीरपरिसरः | |
| ४५. | कबड्डी<br>(केवलं बालकानाम्) | १. मनोज कुमारः ५. सुनिल कुमार गोरा<br>२. अनिल कुमार शर्मा ६. रामेहरः<br>३. रोशन लालः ७. प्रवीण कुमारः<br>४. राहुलः ८. मांगेराम<br>जयपुरपरिसरः | १. विशाल शर्मा ५. हरिघ्म<br>२. सनीत गौड़ ६. मनीष कुमार तिवारी<br>३. सचिन गौड़ ७. दिव्यांशु मिश्रः<br>४. विकास कुमारः ८. हरिओम शर्मा<br>लखनऊपरिसरः | |
| ४६. | खो-खो<br>(केवलं बालिकानाम्) | १. संजिता सरकारः ६. अनिमा सरदार<br>२. सुस्मिता दासः ७. पुष्पिता नाथः<br>३. संगीता सरकारः ८. राखी दासः<br>४. मन्जु रांखल ९. पूजा राय<br>५. सुतपा दासः १०. पूजा राय<br>एकलव्यपरिसरः | १. दीक्षा शर्मा ६. सपना देवी<br>२. पूजा देवी ७. नेहा धीमान्<br>३. अंजलि ठाकुरः ८. जसप्रीत कौर<br>४. संजीव कुमारी ९. विशाली<br>५. संजीव कुमारी<br>वेदव्यासपरिसरः | |
| ४७. | चतुरङ्गम् (बालकानाम्) | रवि आर्य, क. जे. सोमैयासंस्कृतविद्यापीठम् | दीपज्योति देब, गुरुवायूरपरिसरः | |
| ४८. | चतुरङ्गम् (बालिकानाम्) | प्रज्ञा शुक्ला, भोपालपरिसरः | ममतारानी पंडा, क.जे सोमैयासंस्कृतविद्यापीठम् | |
| | | **(तृतीयपुरस्कारः)** | **(द्वितीयपुरस्कारः)** | **(प्रथमपुरस्कारः)** |
| ४९. | मल्लयुद्धम् प्रथमः वर्गः | शुभम्, वेदव्यासपरिसरः<br>चन्द्रशेखर शंकरराव आर्य, भोपालपरिसरः | विशाल शर्मा<br>लखनऊपरिसरः | सुरेश कुमार जितरवाल<br>जयपुरपरिसरः |
| ५०. | मल्लयुद्धम् द्वितीयः वर्गः | रोहित शर्मा, श्रीरणवीरपरिसरः<br>चन्दन सरकार, लखनऊपरिसरः | शशांक मिश्रः<br>भोपालपरिसरः | ख्याली राम सैनी<br>जयपुरपरिसरः |
| ५१. | मल्लयुद्धम् तृतीयः वर्गः | अंकित यादव, भोपालपरिसरः<br>अंकुश कुमार, श्रीरणवीरपरिसरः | रमेशः<br>जयपुरपरिसरः | गौरव पटियाल<br>वेदव्यासपरिसरः |
| ५२. | मल्लयुद्धम् चतुर्थः वर्गः | हर्षित गौड़, लखनऊपरिसरः<br>दिव्यांशु आर्य, भोपालपरिसरः | अमर नाथः<br>वेदव्यासपरिसरः | आलोक कुमारः<br>जयपुरपरिसरः |
| ५३. | मल्लयुद्धम् पञ्चमः वर्गः | जयदीपः, श्रीरणवीरपरिसरः<br>विशाल शर्मा, लखनऊपरिसरः | शुभम्<br>वेदव्यासपरिसरः | राहुलः<br>जयपुरपरिसरः |



## कुलपतिदैनन्दिनी

- जनवरिमाससस्य १३दिनाङ्के वृन्दावनस्थे दिव्यतिदित्यप्रेममन्दिरे समायोजिते अन्ताराष्ट्रियभक्तियोगसाधनासमारोहे उपस्थितिः।
- जनवरीमासस्य १९दिनाङ्के दिल्लीसंस्कृत-अकादमीद्वारा आयोजिते कविसम्मेलने उपस्थितिः।
- जनवरीमासस्य २१दिनाङ्के अगरतलास्थे एकलव्यपरिसरे समायोजितायाम् ५६तम्याम् अखिलभारतीयशास्त्रीयस्पर्धायाम् अध्यक्षत्वेन उपस्थितिः।
- फरवरीसासस्य ४ दिनाङ्के छत्तरपुरस्थिते आद्यकात्यायनीशक्तिपीठे Oriental Heritage of Shree Adyakatyani Shaktipeetha इति विषये समायोजिते अन्ताराष्ट्रियसम्मेलने उपस्थितिः।
- फरवरीमासस्य ११दिनाङ्के मैसूरुनगरे समायोजिते विदुषां गङ्गाधरभट्टानाम् अभिनन्दनसमारोहे उपस्थितिः।
- फरवरीमासस्य १७दिनाङ्के दिल्लीसंस्कृत-अकादमीद्वारा समायोजिते अखिलभारतीयनवोदितकविसम्मेलने उपस्थितिः।
- फरवरीमासस्य १८दिनाङ्के महामहोपाध्यायानाम् आचार्याणां श्रीधरवसिष्ठमहोदयानां जयन्त्युत्सवमुपलक्ष्य शिष्यवासिष्ठम् इति ग्रन्थस्य लोकार्पणकार्यक्रमे मुख्यवक्तृत्वेन उपस्थितिः।
- मार्चमासस्य ८दिनाङ्के मुम्बईस्थे क.जे. सोमैयासंस्कृतविद्यापीठे समायोजिते दशामन्तःपरिसरीययुवमहोत्सवे उपस्थितिः।
- मार्चमासस्य १४दिनाङ्के श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे Skill Development of Teacher Education इति विषये समायोजितायां राष्ट्रियसंगोष्ठ्यां मुख्यातिथित्वेन उपस्थितिः।
- मार्चमासस्य १८दिनाङ्के पुरीस्थे श्रीसदाशिवपरिसरे समायोजिते शताब्दीसमारोहे उपस्थितिः।
- मार्चमासस्य २३दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य उपाधिदानकार्यक्रमे सारस्वतातिथिरूपेण उपस्थितिः।
- मार्चमासस्य २५दिनाङ्के दिल्लीसंस्कृत-अकादमीद्वारा समायोजिते त्रिदिवसीयाखिलभारतीयसंस्कृतसम्मेलनस्य उद्घाटनसत्रे सारस्वतातिथिरूपेण उपस्थितिः।
- मार्चमासस्य २६दिनाङ्के हरियाणस्थे श्रीसनातनसंस्कृतमहाविद्यालये आयोजिते संस्कृतविदुषां सम्माननकार्यक्रमे मुख्यातिथित्वेन उपस्थितिः।

## प्राध्यापकानां कार्यकलापाः

**डा. रमाकान्तमिश्रः** – नवेम्बरमासे प्रवृत्तायां ओडिशाराज्यसंस्कृतपाठ्यपुस्तकनिर्माणकार्यशालायां विषयविशेषज्ञरूपेण भागमग्राहीत्। डिसेम्बर 17 दिनाङ्के मयूरभुञ्जमण्डले पञ्चपल्लीविद्यालयस्य रजतजयन्त्योत्सवावसरे मुख्यवक्तृत्वेन भागमवहत्।

**डा. उत्तमसिंहः** – एकलव्यपरिसरस्य बौद्धदर्शनविभागस्य अध्यापकोऽयं नवदेहलीस्थराष्ट्रियपाण्डिलिपिमिशन् द्वारा गुजरातराज्यस्य कच्छविश्वविद्यालये 21-08-2017 तः 25-8-17 पर्यन्तम् आयोजितायां 'पाण्डुलिपि एवं पुरालिपिविज्ञान-अध्ययन-कार्यशालायां' विषयविशेषज्ञरूपेण भागं गृहीत्वा ब्राह्मी एवं प्राचीनदेवनागरीलिपीनां प्रशिक्षणं दत्तवान्। 4-12-2017 तः 08-12-2017 पर्यन्तं राजस्थानस्थ-लाडनूं-जैनविश्वभारतीसंस्थाने (मानितविश्वविद्यालयः) पाण्डिलिपि-अध्ययनविषयक-कार्यशालायां पाण्डुलिपिसंरक्षणसंपादनविधानं प्राचीनदेवनागरीलिपीनां प्रशिक्षणं दत्तवान्।

**प्रो. सुदेशकुमारशर्मा** – आचार्यः सुदेशकुमारशर्मवर्यः फरवरीमासस्य 2 दिनाङ्के श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विद्यापीठस्य शिक्षाविभागे मुख्यातिथिरूपेणोपस्थाय विशिष्टव्याख्यानमकरोत्। श्रीसोमनाथसंस्कृतविश्वविद्यालये व्याख्यातृपदनिमित्तंसञ्चालितसाक्षात्कारे परीक्षकरूपेण फरवरीमासस्य 15 दिनाङ्के समतिष्ठत्।

**प्रो. मदनमोहनझाः** – प्रो. मदनमोहनझामहोदयः राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य शृङ्गेरीस्थे राजीवगान्धिपरिसरे ज्योतिषशिक्षाविभागयोः 24-25 फरवरी 2018तमे दिनाङ्कयोः समायोजितायाः द्विदिवसीयराष्ट्रियसङ्गोष्ठ्याः उद्घाटकरूपेण समुपस्थाय ससम्मानं सभामुदबोधयत्।

**प्रो. ई.एम्. राजन्**- केरलराज्यस्य तृप्पुणित्तुरासंस्कृतसर्वकारीयमहाविद्यालये राष्ट्रियसङ्गोष्ठ्यां मुख्यातिथिरूपेणभागमूढ्वा प्रबन्धमण्डनमकरोत्। एवञ्च पट्टाम्बीस्थे पुण्णशेरी-नीलकण्ठ-शर्मा महाविद्यालये विशिष्टव्याख्यानमकरोत्।

**प्रो. बोधकुमारझाः** – बिहारराज्यस्य श्रीकामेश्वरसिंहसंस्कृतविश्वविद्यालये जनवरीमासस्य 22 तः 27 दिनाङ्कपर्यन्तं समायोजिते 58तमे

स्थापना-दिवससमारोहे महाराजाधिराजकामेश्वरसिंहस्मृतिशास्त्रार्थसभायां प्रो. बोधकुमारझावर्यः आचार्येण श्रीधरमिश्रवर्येण सह व्याकरणशास्त्रे वाक्यार्थं प्रास्तुवान्।

**डा. देवदत्तसरोदे** - जनवरीमासस्य 10 दिनाङ्कतः 13 पर्यन्तं प्रचलिते तृतीयविश्ववेदविज्ञानसम्मेलने भागमगृहीत्। एवमेव गुजरातस्य अहमदाबादनगरस्थे बी. डी. महाविद्यालये जनवरीमासस्य 20 दिनाङ्कतः 21 पर्यन्तं समायोजितायां द्विदिवसीयान्ताराष्ट्रियसङ्गोष्ठ्यां भागमूढ्वा पत्रं प्रास्तौत्।

**डा. ई. आ. नारायणन्** - संस्थानस्य अगरतलास्थे एकलव्यपरिसरे मार्चमासस्य 22 दिनाङ्कतः 28 पर्यन्तं प्रचलितायां मूक्स-स्वयम् (MOOCS-SWAYAM) कार्यशालायां भागग्रहणमकरोत्।

**डा. शुभाषचन्दरमीणा** - डा. सुभाषचन्दरमीणा 15-03-2018 तः 24-03-2018 पर्यन्तं शृङ्गेरीस्थे राजीवगान्धिपरिसरे समायोजितायां मुक्तस्वाध्यायपीठस्य प्रशिक्षणकार्यशालायां भागमवहत्।

**डा. कुमारः** - जनवरीमासस्य 2 दिनाङ्कतः 12 दिनाङ्कपर्यन्तं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे समायोजितायां परीक्षानिर्माणम् इति शिर्षकयुक्तदशदिवसीयकार्यशालायां भागग्रहणं कृत्वा प्रथमश्रेणीं प्राप्नोत्।

**डा. एम्. सुदर्शनचिपळूणकरः** - जनवरीमासस्य 2 दिनाङ्कतः 12 दिनाङ्कपर्यन्तं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे समायोजितायां परीक्षानिर्माणम् इति शीर्षकयुक्तदशदिवसीयकार्यशालायां भागग्रहणं कृत्वा श्रेणीं प्राप्नोत्। एवमेव तिरुपतिस्थे राष्ट्रियसंस्कृत-विद्यापीठे जनवरीमासस्य 31 दिनाङ्कतः फरवरी 3 दिनाङ्कपर्यन्तं समायोजिते छात्रप्रातिभसमारोह (Talent Festival) कार्यक्रमे अस्मत्परिसरीयच्छात्रान्स्वीकृत्य मार्गदर्शकरूपेण भागग्रहणमकरोत्।

**डा. श्रीमती गीता दूबे** - तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे जनवरीमासस्य 31 दिनाङ्कतः फरवरी 3 दिनाङ्कपर्यन्तं समायोजिते छात्रप्रातिभसमारोह (Talent Festival) कार्यक्रमे अस्मत्परिसरीयच्छात्रान्स्वीकृत्य मार्गदर्शिकारूपेणभागग्रहणमकरोत्।

**डा. विनोदकुमारशर्मा** - शृङ्गेरीस्थे राजीवगान्धिपरिसरे समायोजितायां शिक्षाशास्त्रीयराष्ट्रियसङ्गोष्ठ्यां फरवरीमासस्य 24-25 दिनाङ्कयोः उपस्थाय समावेशात्मकशिक्षायाः सम्प्रत्ययः इति विषयकं स्वीयं पत्रं प्रास्तौत्।

**डा. अनिरुद्धनारायणशुक्लः** - उत्तराखण्डराज्यस्य देवप्रयागेस्थिते रघुनाथकीर्तिपरिसरे समायोजितायां ज्योतिषराष्ट्रियसङ्गोष्ठ्यां फरवरीमासस्य 6तमे दिनाङ्के डा. अनिरुद्धनारायणशुक्लवर्यः भागग्रहणमकरोत्। अपिच शृङ्गेरीस्थे राजीवगान्धिपरिसरे समायोजितायां ज्योतिष-राष्ट्रियसङ्गोष्ठ्यां फरवरीमासस्य 24-25 दिनाङ्कयोः उपस्थाय स्वकीयपत्रप्रस्तुतिमकार्षीत्। एवमेव 15-03-2018 तः 24-03-2018 पर्यन्तं शृङ्गेरीस्थे राजीवगान्धिपरिसरे समायोजितायां मुक्तस्वाध्यायपीठस्य प्रशिक्षणकार्यशालायां भागमवहत्।

**प्रो. के.बी. सुब्बरायुडुः** - १५.०१.२०१८. नवदेहली मध्ये कार्यालयीयपरिचर्चायां भागग्रहणम्। ०१.०२.२०१८. तः १०.०२.२०१८ पर्यन्तं राष्ट्रियसंस्कृतसंस्थानम् श्रीरघुनाथकीर्तिपरिसरस्य विविधगोष्ठीषु आध्यक्षं संयोजनकार्यञ्च निर्व्यूढम्। १५.०२.२०१८ तः २०.०२.२०१८ पर्यन्तं तेलङ्गानास्थिते वासरक्षेत्रे वैदिकसम्मेलने मुख्यातिथिरूपेण भागग्रहणम्। २७.०२.२०१८ तथा २८.०२.२०१८ तमे दिनाङ्के न्यायविभागीयसंगोष्ठ्या आध्यक्षं संयोजनं निर्व्यूढम्। ०७.०३.२०१८ तः १०.०३.२०१८ पर्यन्तं राष्ट्रियसंस्कृतसंस्थाने मुम्बईस्थिते के.जी.सोमैय्यापरिसरे युवमहोत्सवे भागग्रहणम्। ११.०३.२०१८ तमे दिनाङ्के उत्तराखण्डसंस्कृतविश्वविद्यालये विद्वत्परिषदि विषयविशेषज्ञसदस्यत्वेन भागग्रहणम्। १२.०३.२०१८ तमे दिनाङ्के उत्तराखण्डसंस्कृतविश्वविद्यालये दीक्षान्तसमारोहे भागग्रहणम्। तथा विद्वतपरिषत् सदस्यरूपेण उपस्थितिः। २७.०३.२०१८ तः २८.०३.२०१८ दिनाङ्कपर्यन्तं राष्ट्रियसंस्कृतसंस्थाने श्रीरणवीरपरिसरे दर्शनविभागस्य संगोष्ठ्यां मुख्यातिथिरूपेण उपस्थितिः।

**प्रो. बनमाली बिश्वालः** - राष्ट्रियसंस्कृतसंस्थानस्याङ्गभूते देवप्रयागस्थे श्रीरघुनाथकीर्ति-परिसरे ०१.०२.२०१८ तः १०.०२.२०१८ दिनाङ्कं यावद् आयोजितासु विविध-विभागीयासु राष्ट्रियअन्ताराष्ट्रिय-संगोष्ठीषु नैकेषु सत्रेषु दायित्वं सम्पादितवान्- ०२-०३.०२.२०१८ दिनाङ्कयोः संस्कृतव्याकरणपरम्परायां बौद्धवैयाकरणानां योगदानमिति विषयमधिकृत्य समायोजितायां व्याकरण विभागीयायां द्विदिवसीयायाम् अन्ताराष्ट्रियसंगोष्ठ्यां विषयप्रवर्तनं कृतवान्, एकस्मिन् सत्रे सत्राध्यक्षत्वं निर्व्यूढवान् तथा संस्कृतव्याकरणपरम्परायां रूपावतारस्य योगदानमिति इति विषयमधिकृत्य शोधपत्रं च प्रस्तुतवान्। ०४-०५.०२.२०१८ दिनाङ्कयोः "बौद्धमिश्रितसंस्कृतसाहित्यस्य वैश्विकसन्देशः" इति विषयमधिकृत्य प्रवर्तितायां साहित्यविभागीयराष्ट्रियसंगोष्ठ्यां

स्वागतभाषणं कृतवान्, एकस्मिन् सत्रे सत्राध्यक्षत्वं निर्व्यूढवान् तथा "Buddhist charyas as reflected in Atish Dipankara*s Charyasangrahapradipa". इति विषयं चोपस्थापितवान्। ८-९.२.२०१८ दिनाङ्कयोः समायोजितायाम् आधुनिकविषयकराष्ट्रियसंगोष्ठ्यां एकस्मिन् सत्रे सत्राध्यक्षत्वं निर्व्यूढवान् तथा भारतीय नारी अतीत से वर्तमान तक (संस्कृतवाङ्मय के विशेष सन्दर्भ में) इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्। १५.०२.२०१८ तः १७.०२.२०१८ दिनाङ्कं यावत् पुणे-विश्वविद्यालयस्य प्रगतसंस्कृताध्ययनकेन्द्रे समायोजितायां संस्कृतभाषाया अन्यभाषा-साहित्योपरि प्रभावः (The Influence of Sanskrit on other Indian Languages and literature) - विषयकत्रिदिवसीयराष्ट्रियसम्मेलने सत्राध्यक्ष्यं निरवहत् तथा विशिष्टे चर्चासत्रे (Plenary Session) मध्यपहाडी क्षेत्र की गढवाली उपभाषा और उस पर संस्कृत का प्रभाव इति विषयमधिकृत्य विशिष्टव्याख्यानं प्रदत्तवान्। १५.०३.२०१८ तः १७.०३.२०१८ दिनाङ्कं यावत् पुणे-विश्वविद्यालयस्य प्रगतसंस्कृताध्ययनकेन्द्रे समायोजितायां योगः (सिद्धान्तः प्रयोगश्च) - (Yoga - Theory and Practice) विषयकत्रिदिवसीयअन्ताराष्ट्रियसम्मेलने सत्राध्यक्ष्यं निरवहत् तथा विशिष्टे चर्चासत्रे भारतीयपरम्परायां योगः तत्स्वरूपञ्च इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्। ३०.०३.२०१८ तमे दिनाङ्के हरिद्वारस्थ-आदर्शसंस्कृतमहाविद्यालये संस्कृतवाङ्मये मानवमूल्यानि इति विषयमधिकृत्य समायोजितायाम् एकदिवसीयराष्ट्रियसंगोष्ठ्यां सत्राध्यक्षरूपेण उपस्थाय आधुनिकसंस्कृतकथासु मानवमूल्यनि इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्। १९.०२.२०१८ तः २३.०२.२०१८ दिनाङ्कं यावत् पुणे-विश्वविद्यालयस्य प्रगतसंस्कृताध्ययनकेन्द्रे समायोजितायां व्याख्यानमालायां विशिष्टव्याख्यानानि प्रदत्तवान्। ०४.०२.१८ तमे दिनाङ्के देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे अखिलभारतीयसंस्कृतकविसमवाये संस्कृतकाव्यपाठं प्रस्तुतवान्। ३०.०३.१८ तमे दिनाङ्के हरिद्वारस्थ-आदर्शसंस्कृतमहाविद्यालये अखिलभारतीयसंस्कृतकविसमवाये संस्कृत-काव्यपाठं प्रस्तुतवान्। कथासरित्पत्रिका-पद्यबन्धा-सदृशीनां नैकासां पत्रपत्रिकाणां सम्पादनं कृतवान्। मन्मार्गदर्शने अस्मिन्नवधौ प्रयागस्थ-गङ्गानाथझापरिसरस्य एकः शोधच्छात्रः शोधप्रबन्धं प्रस्तुतवान्।

**डॉ. मनीषजुगरानः** - जनवरीमासे उत्तराञ्चलउत्थानपरिषदा श्रीनगरे आयोजिते मदीयग्रामः, मदीयं तीर्थम् इत्यस्मिन् कार्यक्रमे संस्कृतशिक्षाक्षेत्रे उल्लेखनीयकार्यार्थं डॉ. नित्यानन्दस्वामी इति कर्तव्यपरायणता पुरस्कारेण सभाजितः। फरवरीमासे परिसरे आयोजितासु वेद-व्याकरण-साहित्य-वेदान्त-आधुनिक-न्याय- ज्योतिषशास्त्रीयसङ्गोष्ठीषु शोधपत्राणि प्रास्तौत्। मार्चमासे मुम्बईस्थ- क.जे. सोमैय्यापरिसरे आयोजिते युवसम्मेलने गणमार्गदर्शकत्वेन भागः गृहीतः। मार्चमासस्य षोडशदिनाङ्के देवप्रयागस्थ-सरस्वतीविद्यामन्दिरद्वारा शिक्षायाः उन्नयनम् इति विषये आयोजितायां सङ्गोष्ठ्यां मुख्यवक्तृत्वेन उपस्थाय मार्गदर्शनम् अकारि। मार्चमासस्य २२ दिनाङ्कात् २८ दिनाङ्कं यावत् अगरतलास्थिते एकलव्यपरिसरे आयोजितायां MOOCs on SWAYAM इति विषयिण्यां कार्यशालायां भागं गृहीतवान्।

**डा. शैलेन्द्र प्रसाद उनियालः** - फरवरीमासे राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य वेदविभागेन समायोजितायां राष्ट्रियवैदिकसंगोष्ठ्यां दिनद्वयव्यापिन्यां "यजुर्वेदीयस्वरसंचालनविधिः" इत्याख्यं शोधपत्रं प्रस्तुत्य सत्राध्यक्ष्यं प्रास्ताविकं च विनिवेद्य प्रतिवेदनञ्च प्रास्तौत्। फरवरीमासे राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य व्याकरणविभागेन समायोजितायामन्ताराष्ट्रियसंगोष्ठ्यां "सारस्वतवैयाकरणानुभूतिस्वरूपाचार्यस्य योगदानम्" इति विषयमधिकृत्य स्वीयं शोधपत्रं पठितवान्। फरवरीमासे राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य साहित्यविभागेन समायोजितायामन्ताराष्ट्रियसंगोष्ठ्यां "बौद्धमिश्रितसंस्कृतसाहित्यवैदिकसाहित्ययोः मौलिकं साम्यम्" इति विषयमाधृत्य शोधपत्रं प्रतिष्ठापितम्। फरवरीमासे राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य ज्योतिषविभागेन समायोजितायां राष्ट्रियसंगोष्ठ्यां "वेदालोके ज्योतिषशास्त्रे सृष्टिविज्ञानम्" विषयमिमवलम्ब्य शोधपत्रं प्रतिपादितवान्। फरवरीमासे राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य आधुनिकविभागेन समायोजितायां राष्ट्रियसंगोष्ठ्यां "वैदिक एवं लौकिक वाङ्मय में नवधा भक्ति एक ऐतिहासिक समालोचन" इत्यस्मिन् शीर्षके शोधपत्रं सत्राध्यक्ष्यञ्च सम्पादितवान्। फरवरीमासे राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य वेदान्तविभागेन समायोजितायां राष्ट्रियसंगोष्ठ्यां "उपनिषद्वाङ्मये ब्रह्मचिन्तनम्" इत्यस्मिन् विषये स्वकीयं शोधपत्रं प्रस्तुतवान्।

फरवरीमासे तैलंगनाराज्यस्य बासरस्थाने महर्षिसान्दिपनीवेदविद्याप्रतिष्ठानसम्बद्धश्रीभारतीपीठवेदविद्यालयेन समायोजिते क्षेत्रीयवैदिकसम्मेलने विशिष्टातिथित्वेन संचालनपूर्वकं "वेदेषु सामाजिकोन्नतिसंदेशः" इत्याख्ये विषये विशिष्टं व्याख्यानं सम्पादितवान्। फरवरीमासे राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य न्यायविभागेन समायोजितायां राष्ट्रियसंगोष्ठ्यां "वेददृशा पदवृत्तिविचारः" इति शीर्षकान्वितं शोधपत्रं प्रस्तुतवान्।

# लखनऊपरिसरवार्ता

**पं. दीनदयाल-उपाध्याय-जन्मशती-सम्पूर्तिसमारोहः**

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे अक्टूबरमासस्य षोडशे दिनाङ्के पं. दीनदयाल- जन्मशतीसमारोहस्य सम्पूर्तिसमारोहः आचरितः। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण समुपस्थिताः आसन् उत्तरप्रदेशस्य विधानसभायाः अध्यक्षाः श्रीहृदयनारायणदीक्षितमहाभागाः। सरस्वत्याः अर्चनया माल्यार्पणेन च कार्यक्रमः प्रारब्धः। परिसरीयच्छात्रैः मङ्गलाचरणमाचरितम्। अध्यक्षपदं समलङ्कृतवन्तः परिसरस्य प्राचार्याः प्रो. विजयकुमारजैनमहोदयाः। कार्यक्रमस्य संयोजनं कृतवन्तः साहित्यविभागीयप्राध्यापकाः डॉ. पवनकुमारदीक्षितमहाभागाः। कार्यक्रमेऽस्मिन् अन्ये परिसरीयप्राध्यापकाः कर्मचारिणः छात्राश्च समुपस्थिताः आसन्।

**राष्ट्रियैकतादिवसः**

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे मानवसंसाधनविकासमन्त्रालयस्य निर्देशानुसारं अक्टूबरमासस्य ३१ दिनाङ्के राष्ट्रियैकतादिवसः आचरितः। दिवसेऽस्मिन् आशुभाषणनिबन्धलेखनप्रतियोगिते आयोजिते। एतयोः प्रतियोगितयोः प्रथमद्वितीयतृतीयपुरस्कारोऽपि प्रदत्तः। तत्र निबन्धलेखनप्रतियोगितायां प्रथमस्थानं वैभवपाण्डेयः, द्वितीयस्थानं सत्याञ्जलत्रिपाठी, तृतीयस्थानं कार्तिकजोशी च लब्धवन्तः। आशुभाषणप्रतियोगितायां प्रथमं स्थानं सत्याञ्जलत्रिपाठिना, द्वितीयस्थानं दिनेशचन्द्रवेलवालेन, तृतीयस्थानञ्च सूरजोपाध्यायेन प्राप्तम्। अनन्तरं सायंकाले ५ वादने परिसरे शोभायात्रायाः अपि आयोजनम् अभूत्। तत्र सर्वेऽपि परिसरीयप्राध्यापकाः कर्मचारिणः छात्राश्च सहभागं गृहीतवन्तः। भाषणे एवं निबन्धलेखनप्रतियोगितायां निर्णायकरूपेण प्रो. शिशिरकुमारपाण्डेय- प्रो. देवीप्रसादद्विवेदिमहोदयौ च आस्ताम्। कार्यक्रमोऽयं श्री प्रमोदकुमारशुक्ल- डॉ. प्रविणचौधरिमहोदयोः च निर्देशने सम्पन्नः।




राष्ट्रियैकतादिवसमुपलक्ष्य आयोजितायाः शोभायात्रायाः दृश्यम्

**जागरुकतासप्ताहः**

रष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे अक्टूबरमासस्य ३० दिनाङ्कतः ४ नवम्बरमासं यावत् जागरुकतासप्ताहः आचरितः। अस्य कार्यस्य सुव्यवस्थितसम्पादनाय प्रो. शिशिरकुमारपाण्डेय- डॉ. पवनकुमारदीक्षित- श्री जगन्नाथझा- डॉ. कविताविसारिया- श्रीराजेशकुमारमिश्रमहोदयानाम् एका समितिः निर्मिता। अस्याः निर्देशने एव सम्पूर्णसप्ताहस्य कार्यक्रमस्य सञ्चालनम् अभूत्।

**ज्यौतिषपरिचयवास्तुशास्त्रे परिचयपाठ्यक्रमस्य उद्घाटनकार्यक्रमः**

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे नवम्बरमासस्य द्वितीय दिनाङ्के ज्यौतिषवास्तुशास्त्रपरिचयपाठ्यक्रमस्योद्घाटनं सञ्जातम्। मुख्यातिथिरूपेण श्री जयप्रकाशत्रिपाठी, अध्यक्षरूपेण प्रो. शिशिरकुमारपाण्डेयः विशिष्टातिथिरूपेण श्री दिनेशकुमारमहोदयः च आसीत्। संयोजकत्वेन समुपस्थिताः प्रो. मदनमोहनपाठकमहोदयाश्च आसन्। कार्यक्रमे सर्वेऽपि प्रतिभागिनः सोत्साहं भागं गृहीतवन्तः। कार्यक्रमस्यारम्भः सरस्वत्या वन्दनया माल्यार्पणेन दीपप्रज्वालनेन च संजातः। कार्यक्रमस्य सञ्चालनं डॉ. ज्योतिप्रसाददाशमहोदयेन कृतम्। धन्यवादज्ञापनं डॉ. चन्द्रश्रीपाण्डेयमहोदयया कृतम्।

**राज्यस्तरीयशास्त्रीयचयनस्पर्धा**

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे नवम्बरमासस्य ११ एवं १२ दिनाङ्के राज्यस्तरीयशास्त्रीयचयनस्पर्धायाः आयोजनं सञ्जातम्। अस्यां प्रतियोगितायां द्वादशजनपदेभ्यः चत्त्वारिंशत् छात्राः प्रतिभागं कृतवन्तः। अत्र निर्णायकरूपेण समागतवन्तः काशीविश्वविद्यालयात् प्रो. कमलेशझा भोपालपरिसरस्य प्राचार्यचराः प्रो. आजादमिश्रः, प्रो. जानकीप्रसादद्विवेदिमहाभागाश्च। कार्यक्रमस्य संयोजनं व्याकरणविभागेन कृतम्। कार्यक्रमे उद्घाटनसत्रे संचालनकार्यं कृतवन्तः व्याकरणविभागाध्यक्षाः प्रो. भारतभूषणत्रिपाठिमहाभागाः। स्वागतभाषणम् आधुनिकविभागस्य संकायाध्यक्षाः प्रो. शिशिरकुमारपाण्डेयवर्याः कृतवन्तः। मङ्गलाचरणं परिसरीयछात्रैः कृतम्। अध्यक्षीयभाषणान्ते धन्यवादज्ञापनं व्याकरणविभागीयप्राध्यापकेन डॉ. यदुवीरस्वरूपब्रह्मचारिवर्येण कृतम्। प्रतियोगितायां प्रथमद्वितीयतृतीयस्थानप्राप्तेभ्यः क्रमशः १०००/८००/५०० रुप्यकाणि प्रमाणपत्रं च पुरस्काररूपेण प्रदत्तम्। १२ दिनाङ्के समापनसत्रे संचालनकार्यं प्रो. भारतभूषणित्रपाठिवर्यः, पुरस्कारघोषणां




राज्यस्तरीयस्पर्धाकार्यक्रमस्य दृश्यम्

डॉ. यदुवीरस्वरूपब्रह्मचारिमहोदयः धन्यवादज्ञापनं च श्रीप्रमोदकुमारशुक्लाश्च कृतवन्तः। कार्यक्रमस्यान्ते शान्तिमन्त्रोच्चारणम् अजायत।

**दर्शनोत्सवसमारोहः**

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे नवम्बरमासस्य अष्टाविंशति दिनाङ्के दर्शनोत्सवसमारोहस्य आयोजनं सञ्जातम्। कार्यक्रमोऽयं राष्ट्रियसंस्कृतसंस्थान- भारतीयदार्शनिकानुसंधानपरिषदोः संयुक्ततत्त्वावधाने आयोजितः। कार्यक्रमस्य आरम्भः सरस्वत्याः माल्यार्पणेन दीपप्रज्वालनेन मङ्गलाचरणेन अभवत्। मुख्यातिथिरूपेण समागतौ श्री श्रीशदेवपुजारी- डॉ. वाचस्पतिमिश्रमहाभागौ। कार्यक्रमस्य सञ्चालनं संयोजनं च साहित्यविभागीयप्राध्यापकेन डॉ. पवनकुमारदीक्षितमहोदयेन कृतम्। भारतीयदर्शनानि स्वीकृत्य दर्शनोत्सवे एका लिखितपरीक्षा कृता। परीक्षायां प्रथमद्वितीयतृतीयस्थानं प्राप्तेभ्यो बालकेभ्यः पुरस्कारोऽपि प्रदत्तः। भाषणप्रतियोगितायामपि चितेभ्यः प्रथमद्वितीयतृतीयस्थानप्राप्तेभ्यः छात्रेभ्यः पुरस्कारः प्रदत्तः। अस्मिन्कार्यक्रमे भारतीयानुसन्धानपरिषदः निदेशिका डॉ. पूजाव्यासमहोदया अन्ये परिसरीयप्राध्यापकाः छात्राश्च समुपस्थिताः आसन्। धन्यवादज्ञापनं बौद्धदर्शनविभागीयप्राध्यापकेन डॉ. गुरुचरणसिंहनेगिमहोदयेन कृतम्।

**गीताजयन्तीसमारोहः**

नवनम्बरमासस्य त्रिंशति दिनाङ्के राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे गीताजयन्तीसमारोहः आचरितः। अत्र गीतायाः विषये वक्तुं मुख्यवक्तृरूपेण- मदनजी श्रीवास्तवः, श्री अश्विनीकुमारः, डॉ. नीरजतिवारी, डॉ. ज्योतिप्रसाददाशमहोदायाश्च समुपस्थिताः। विद्यार्थिनोऽपि स्वस्वमतं समुपस्थापितवन्तः। कार्यक्रमेऽस्मिन् प्राक्शास्त्रिच्छात्रः श्रीसुमितकुमारशुक्लः गीतायाः पञ्चदशस्य अध्यायस्य पारायणं कृतवान्। अन्ये वक्तारः स्वस्वमत्यनुसारं श्रीमद्भगवद्गीतायाः विषये स्वस्वविषयं प्रस्तुतवन्तः। अन्ते अध्यक्षीयभाषणं परिसरप्राचार्येण प्रो. विजयकुमारजैनमहोदयेन कृतम्। कार्यक्रमस्य आयोजनं राष्ट्रियसंस्कृतसंस्थानविवेकानन्दकेन्द्रयोः तत्वावधाने सञ्जातम्। अस्य कार्यक्रमस्य संयोजनं सञ्चालनं च व्याकरणविभागीयप्राध्यापकेन डॉ. यदुवीरस्वरूपब्रह्मचारिणा कृतम्। कार्यक्रमेऽस्मिन् सर्वेऽपि परिसरीयप्राध्यापकाः छात्राश्च समुपस्थिताः आसन्।

**संस्कृतविज्ञानप्रदर्शिनी**

राष्ट्रियसंस्कृतसंथाननखनऊपरिसरे दिसम्बमासस्य पञ्चदशदिनाङ्के संस्कृतभारत्या संस्कृतविज्ञानप्रदर्शनीआयोजिता। अवसरेऽस्मिन् परिसरप्राचार्येण सह प्रो. सुरेन्द्रझा-प्रो. भारतभूषणत्रिपाठिमहोदयौ संस्कृतविज्ञानप्रदर्शिन्याः समुद्घाटनं कृतवन्तौ। अनया प्रदर्शिन्या परिसरीयच्छात्राः अतिलाभान्विताः अभवन्। अस्य कार्यक्रमस्य संयोजनं व्याकरणविभागीयप्राध्यापकेन श्री प्रमोदकुमारशुक्लेन कृतम्। कार्यक्रमेऽस्मिन् संस्कृतभारत्याः लखनऊ विभागस्य विभागसङ्घटनमन्त्री श्रीमान् गौरवकुमारः छात्राश्च समुपस्थिताः आसन्। कार्यक्रमः प्रातः ११ वादनतः सायं ४ वादनं यावत् आसीत्।

**सौप्रस्थानिकस्वागतसमारोहः**

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे अष्टादशोत्तरद्विसहस्रतमस्य वर्षस्य जनवरीमासस्य पञ्चमे दिनाङ्के कार्यालये कार्यरतश्रीमतः राजेशकुमारमिश्रमहोदयस्य सौप्रस्थानिककार्यक्रमः डॉ प्रदीपकुमारदीक्षितमहोदयस्य सुश्री ज्योतिसिंहस्य च स्वागतकार्यक्रमोऽयोजितः। बहुवर्षेभ्यः कार्यालये कार्यरतश्रीमतः राजेशमहोदयस्य कार्यनिष्ठामवलोकयता केन्द्रियाधिकारिभिः तस्य प्रोन्नतिः कृता। अयं महोदयः लखनऊ परिसरात् मुक्तोभूत्वा मुख्यालयं प्रति प्रोन्नतिं प्राप्य गतवान्। कार्यक्रमस्य प्रारम्भः सरस्वत्याः माल्यार्पणेन अभवत्। कार्यक्रमस्याध्यक्षाः आसन् परिसरीय प्राचार्याः प्रो.विजयकुमारजैनमहोदयाः। कार्यक्रमस्य सञ्चालनं कृतम् अर्थशास्त्रप्राध्यापकेन डॉ. एस.पी.सिंहमहोदयेन। कार्यक्रमे सर्वेऽपि परिसरीयप्राध्यापकाः कर्मचारिणश्च समुपस्थिताः आसन्। अन्ते धन्यवादज्ञापनं कृतवन्तः बौद्धदर्शनविभागीयाः प्राध्यापकाः डॉ. गुरूचरणसिंहनेगिमहाभागाः। अन्ते शान्तिमन्त्रमुक्त्वा कार्यक्रमः समाप्तिं गतः।

**विश्वहिन्दीदिवसः**

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे जनवरीमासस्य १० दिनाङ्के विश्वहिन्दीदिवस आयोजितः। अस्य कार्यक्रमस्यायोजनं संयोजनं च आधुनिकसङ्कायाध्यक्षाः प्रो.शिशिरकुमारपाण्डेयमहोदयाः कृतवन्तः। हिन्दीकाव्यपाठे व्याकरणविभागीयप्राध्यापकः श्री प्रमोदकुमारशुक्लः, पुस्तकालयाध्यक्षः डॉ. घनानन्दत्रिपाठी, कार्यालये कार्यरतः डॉ. हरशान्तवीरसिंहः शोधच्छात्रः श्री अंकुशकुमारः, शिक्षाशास्त्रिकक्षायाः छात्रौ अंकितकुमारभास्करकाण्डपालौ च भागं गृहीतवन्तः। कार्यक्रमस्य सञ्चालकः डॉ एस.पी.सिंहमहोदयाः, अध्यक्षाः आसन् प्रो. शिशिरकुमारपाण्डेयमहोदयाः। धन्यवाद ज्ञापनं कृतवन्तः डॉ. मोहनमिश्रमहोदयाः।

### वसन्तपञ्चमीसमाचरणम्



वसन्तपञ्चम्याचरणस्य दृश्यम्

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे जनवरीमासस्य २२ दिनाङ्के प्रात: ११:०० वादनत: वसन्तपञ्चमीं समुपलक्ष्य मातु: सरस्वत्या: पूजनं सञ्जातम्। कार्यक्रमेऽस्मिन् मुख्ययजमानरूपेण समुपस्थिता: आसन् प्रो.शिशिरकुमारपाण्डेमहोदया: पुरोहितकार्यं कृतवन्त: वेदविभागस्य डॉ. प्रदीपदीक्षितमहोदया:, कार्यक्रमे सर्वेऽपि परिसरीयप्राध्यापका: छात्रा: कर्मचारिणश्च समुपस्थिता: आसन्। मध्याह्ने व्याकरणविभागे विभागीयपूजा अभवत्। श्री प्रमोदकुमारशुक्ल-डॉ. प्रवीणचौधरिमहोदयानां निर्देशने सर्वेऽपि विभागीयच्छात्रा: मातु: सरस्वत्या: पूजामर्चनां च कृतवन्त:।

### गणतन्त्रतादिवस:

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे २०१८ जनवरीमासस्य षड्विंशतिदिनाङ्के प्रात: ध्वजोत्तोलनं सञ्जातम्। परिसरप्राचार्येण प्रो. विजयकुमारजैनमहोदयेन ध्वजोत्तोलनं कृतम्। अवसरेऽस्मिन् सर्वेऽपि परिसरीयप्राध्यापका: छात्रा: कर्मचारिणश्च समुपस्थिता: आसन्। अस्मिन्नेव दिवसे छात्राणां कबड्डी-क्रीडाप्रतिस्पर्धा आयोजिता यस्या: सञ्चालनं कृतवती क्रीडाविभागीया प्राध्यापिका सुश्रीज्योतिसिंहमहोदया। छात्रा: सोत्साहं भागं गृहीतवन्त:।

### प्रबोधनकक्षा

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे २०१८ फरवरी-मासस्य १० दिनाङ्कत: २८ दिनाङ्कं यावत् सर्वेषु विभागेषु छात्राणां कृते प्रेरणां प्रदानाय प्रबोधनकक्षा प्रचालिता। छात्राणां मार्गदर्शनं तथा च स्वस्य लक्ष्यस्य निर्धारणे सहायकं भवतु इत्यत: समायोजिता।

### वार्षिकशैक्षिकस्पर्धा:

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे २०१८ तमवर्षस्य फरवरीमासस्य २१.०२.२०१८ त: २३.०२.२०१८ पर्यन्तं वार्षिकोत्सवं उपलक्ष्य वार्षिकशैक्षिकस्पर्धानामायोजनम् अभूत्। एतासां स्पर्धानां संयोजनं कृतवन्त: व्याकरणविभागाध्यक्षा: प्रो. भारतभूषणत्रिपाठिन: एवं सहसंयोजक: श्री प्रमोदकुमारशुक्लश्च। अत्र निबन्धलेखनस्पर्धा, भाषणस्पर्धा, वाद-विवादस्पर्धाश्च आयोजिता:।

### शलाकापरीक्षायोजनम्

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरस्य व्याकरणविभागेन छात्राणाम् उत्साहवर्धनार्थं तथा परीक्षाया: सिद्धतायै च प्राक्शास्त्रिस्तरे एका शलाकापरीक्षा आयोजिता। अत्र प्राक्शास्त्रिप्रथमवर्षीयच्छात्राणां कृते- वैयाकरणसिद्धान्तकौमुदीत: पञ्चसन्धिप्रकरणम्, तथा लघुसिद्धान्तकौमुदीत: आदित: पञ्चसन्धिं यावत् विषया: निर्धारिता:। प्राक्शास्त्रिद्वितीयवर्षियच्छात्राणां कृते-वैयाकरणसिद्धान्तकौमुदीत: अजन्तप्रकणम् तथा लघुसिद्धान्तकौमुदीत: सम्पूर्णभ्वादिप्रकणम् आसीत्। एषा स्पर्धा फरवरीमासस्य २७ दिनाङ्के सम्पन्ना। अस्या: स्पर्धाया: संयोजनं कृतवन्त: विभागाध्यक्षा: प्रो. भारतभूषणत्रिपाठिन: सहसंयोजका: श्री प्रमोदकुमारशुक्लमोहदयाश्च। अत्र विजितृभ्य: छात्रेभ्य: प्रथम-द्वितीय तृतीयपुरस्काररूपेण क्रमश: १०००, ७००, ५००/- रुप्यकाणि प्रदत्तानि। अस्यां स्पर्धायां निर्णायकरूपेण समुपस्थिता: आसन् अगरतला परिसरस्य व्याकरणविभागाध्यक्षा: प्रो. धनीन्द्रकुमारझामहोदया:, प्रो. भारतभूषणत्रिपाठि-डॉ. यदुवीरस्वरूपब्रह्मचारी -डॉ. प्रवीणचौधरी मोहदयाश्च। कार्यक्रमस्यास्य सञ्चालं कृतवान् व्याकरणविभागीयप्राध्यापक: श्री प्रमोदकुमारशुक्लमहोदय:।

### राष्ट्रियसंगोष्ठी

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे मार्चमासस्य १४ दिनाङ्के वेदव्याकरणविभागीयराष्ट्रियसङ्गोष्ठी आयोजिता। अस्यां संगोष्ठ्यां मुख्यातिथिरूपेण समागता: बनारसहिन्दूविश्वविद्यालयस्य वेदविभागाध्यक्षचरा: प्रो. हृदयरञ्जनशर्ममहोदया: विशिष्टातिथिरूपेण समागता: श्री लालबहादुरशास्त्रीसंस्कृतविद्यापीठस्य व्याकरणविभागीयप्राध्यापका: डॉ. रामसलाहीद्विवेदिवर्या:। अस्मिन् कार्यक्रमे अध्यक्षपदं समलङ्कृतवन्त: परिसरप्राचार्या: प्रो. विजयकुमारजैनमहाभागा:। अस्य कार्यक्रमस्य संयोजक: आसन् प्रो.भारतभूषणत्रिपाठिवर्या:। सहसंयोजकौ श्रीप्रमोदकुमारशुक्ल- डॉ. प्रदीपदीक्षितमहोदयौ च आस्ताम्। कार्यक्रमे सञ्चालनं स्वागतभाषणच प्रो. भारतभूषणत्रिपाठिमहोदयै: कृतम्। शोधसत्रसंचालनं श्री प्रमोदकुमारशुक्लेन-धन्यवादज्ञापनं च डॉ यदुवीरस्वरूपब्रह्मचारिमहोदयै: कृतम्।

### एकदिवसीयमहामहोपाध्यायगोपीनाथकविराजस्मृतिव्याख्यानं राष्ट्रियसङ्गोष्ठी च

मार्चमासस्य १६ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे साहित्यविभागीय- राष्ट्रियसंङ्गोष्ठी समायोजिता। कार्यक्रम: सरस्वत्या:

वन्दनया माल्यार्पणेन च प्रारम्भः। अत्र अतिथयः आसन् प्रो.ओमप्रकाशपाण्डेयः-डॉ. नवजीवनरस्तोगी डॉ. सिद्धात्री इत्यादयः। कार्यक्रमे अध्यक्षपदं सुशोभितवन्तः परिसरप्राचार्याः प्रो. विजयकुमारजैनमहाभागाः कार्यक्रमस्य संयोजनं साहित्यविभागाध्यक्षैः प्रो. रामलखनपाण्डेयमहोदयैः कृतम्। सह संयोजकरूपेण साहित्यविभागीयप्राध्यापकाः डॉ. पवनकुमारदीक्षितमहोदयाः आसन्। अस्य कार्यक्रमस्य सञ्चालनं साहित्यविभागस्य प्राध्यापिका डॉ. गजाला अंसारी-महोदया कृतवती। अन्ते धन्यवादज्ञानपनं कृतवन्तः डॉ. पवनकुमारदीक्षितमहोदयाः।

**ज्योतिषविभागीयराष्ट्रियसङ्गोष्ठी**

राष्ट्रियसंस्कृतसंस्थानलखनऊपरिसरे मार्चमासस्य २० दिनाङ्के ज्योतिषशास्त्रे वृष्टिविचारविषयमधिकृत्य एकदिवसात्मिका राष्ट्रियसङ्गोष्ठी आयोजिता। अस्यां सङ्गोष्ठ्यां श्री कृपाशंकरमिश्रः, प्रो. बृजेशशुक्लः, श्री वैद्यनाथमिश्रः, डॉ. प्रयागनारायण मिश्रः, तथा समस्तविभागीयप्राध्यापकाः समुपस्थिताः आसन्। कार्यक्रमोऽयं डॉ. उमेशपाण्डेमहोदयस्य संयोजकत्त्वे सम्पन्नः। अस्मिन् कार्यक्रमे षष्ट्यधिकशोधपत्राणि प्रवाचितानि। परिसरप्राचार्यः प्रो. विजयकुमारजैनमहोदयाः अध्यक्षपदं समलङ्कृतवन्तः।

**बौद्धदर्शनविभागस्य शिक्षाशास्त्रविभागस्य च राष्ट्रियसङ्गोष्ठी**

बौद्धदर्शनविभागीयसङ्गोष्ठ्याः उद्घाटनं मातुः सरस्वत्याः भगवतः बुद्धस्य च माल्यार्पणेन सञ्जातम्। कार्यक्रमे मुख्यातिथयः भदन्त शान्तिमित्र थेरे तथा विशिष्टातिथयः श्रीमन्तः प्रो. करुणेश कुमारशुक्लमहोदयाः एवं अन्ये विभागीयप्राध्यापकाः प्राचार्यमहोदयाश्च समुपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं सुश्री कृष्णामहोदयया कृतम्।



सङ्गोष्ठ्यां सम्मानयन्तः परिसरप्राचार्याः

**आधुनिकविभागीयराष्ट्रियसङ्गोष्ठी**

मार्चमासस्य २७ दिनाङ्के आधुनिकविभागीयराष्ट्रियसङ्गोष्ठी लखनऊपरिसरे आयोजिता। अस्य कार्यक्रमस्य संयोजकः प्रो. शिशिरकुमारपाण्डेयमहोदयः आसीत्। कार्यक्रमे मुख्यातिथिरूपेण समागताः राज्यपरिवहनमन्त्रिणः श्री स्वतन्त्रदेवसिंहमहोदयाः। अन्ये अतिथयः परिसरप्राचार्याश्च समुपस्थिताः आसन्। कार्यक्रमेऽस्मिन् अनेकानि शोधपत्राणि पठितानि। आधुनिकविभागीयाः सर्वेऽपि प्राध्यापकाः समुपस्थिताः आसन्।

**वार्षिकोत्सवः**

मार्चमासस्य ३०.०३.२०१८ दिनाङ्के परिसरे वार्षिकोत्सवः सम्पन्नः कार्यक्रमे मुख्यातिथयः तिरुपतिस्थस्य राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः प्रो. वी. मुरलीधरशर्ममहोदयाः अध्यक्षरूपेण समुपस्थिताः आसन्। शैक्षिकपुरस्कारघोषणा डॉ. यदुवीर स्वरूपब्रह्मचारिमहोदयेन कृता। क्रीडा पुरस्कार-घोषणा क्रीडाप्राध्यापिकया सुश्री ज्योतिसिंहमहोदयया कृता। कार्यक्रमे सर्वेऽपि परिसरीयप्राध्यापकाः छात्राः कर्मचारिणश्च समुपस्थिताः आसन्। कार्यक्रमस्य संयोजनं प्रो. भारतभूषणत्रिपाठिमहोयाः कृतवन्तः।



पुरस्कारं वितरन्तः राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः प्रो. मुरलीधरशर्मवर्याः

## श्रीरणवीरपरिसरवार्ता

**स्वच्छताभियानम्**

०२.१०.२०१७ दिनाङ्के श्रीरणवीरपरिसरे राष्ट्रपितुः महात्मागान्धिनः जन्मदिवसस्योपलक्ष्ये स्वच्छताभियानमायोजितम्। स्वच्छताभियानेऽस्मिन् परिसरप्राचार्येण परिसरीयैः आचार्यैः कर्मचारिभिः छात्रैश्च साकं स्वकीयं योगदानं प्रदत्तम्।



स्वच्छतां विदधानाः परिसरसदस्याः

**सतर्कताजागरुकतासप्ताहस्यायोजनम्**

३०.१०.२०१७ दिनाङ्कात् ०४.११.२०१७ दिनाङ्कं यावत् परिसरेऽस्मिन्

सतर्कताजागरुकतासप्ताहस्य सोत्साहमायोजनमभवत्। सप्ताहात्मके कार्यक्रमेऽस्मिन् निबन्धलेखनमाशुभाषणचित्रनिर्माणादिस्पर्धाः आयोजिताः। एवञ्च अध्यापकानां कर्मचारिणां कृतेऽपि प्रश्नोत्तरीस्पर्धा आयोजिता। यस्यां सर्वे अध्यापकाः कर्मचारिणश्च सोत्साहं भागं गृहीतवन्तः। कार्यक्रमोऽयं ०४.११.२०१७ दिनाङ्के परिसरप्राचार्याणां प्रो. लोकमान्यमिश्रवर्याणामाध्यक्ष्ये सम्पन्नः। तत्र डॉ. प्रभातकुमारमहापात्रमहोदयाः विशिष्टवक्तृत्वेनोपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं डॉ. योगेन्द्रदीक्षितवर्येण कृतम्। संयोजनं डॉ. कृष्णमुरारिमणित्रिपाठिवर्येण डॉ. आशीषकुमारत्रिपाठिवर्येण च संयुक्तरुपेण कृतम्।

**राष्ट्रियैकतादिवसः**

श्रीरणवीरपरिसरे ३१.१०.२०१७ दिनाङ्के सरदारवल्लभभाईपटेलजयन्तीमुपलक्ष्य राष्ट्रियैकतादिवसः आयोजितः। कार्यक्रमेऽस्मिन् राष्ट्रियैकताविषयिण्यः एकताधावन- गीत-निबन्ध-लेखन-भाषणादिस्पर्धाः आयोजिताः। कार्यक्रमेऽस्मिन् परिसरप्राचार्याः छात्रध्यापककर्मचारिभिः सार्धम् एकताधावनप्रतियोगितायां भागमगृह्णन्। राष्ट्रियैकता- माधारीकृत्य समायोजितायां गीतभाषणनिबन्धलेखनस्पर्धासु सर्वे छात्राः सोत्साहं भागं गृहीतवन्तः। अत्र भाषणस्पर्धायाः विषयः आसीत् - 'राष्ट्रियैकता अखण्डता च' इति। एवञ्च 'सरदारवल्लभभाईपटेल के मौलिकसिद्धान्त', 'भारत की स्वतन्त्रता में सरदारवल्लभभाईपटेल का योगदान इति विषयौ अभिलक्ष्य निबन्धलेखनस्पर्धायाः आयोजनमभवत्। कार्यक्रमस्य समापनसमारोहे परिसरप्राचार्याः अध्यक्षपदमलङ्कुर्वन्तः विजेतृभ्यः प्रतिभागिभ्यः प्रमाणपत्राणि पुरस्कारांश्च प्रदत्तवन्तः। कार्यक्रमस्य संयोजनं डॉ- घनश्याममिश्रवर्येण, डॉ- धनेशकुमारपाण्डेयमहोदयेन, डॉ- शुभश्रीदासवर्यया च संयुक्तरुपेण कृतम्।

**अखिलभारतीयराज्यस्तरीयस्पर्धायाः आयोजनम्**

१३.११.२०१७ दिनाङ्के अस्मिन् परिसरे अखिलभारतीयराज्यस्तरीयस्पर्धा आयोजिता। परिसरप्राचार्यमहोदयानामाध्यक्ष्ये आयोजितेऽस्मिन् कार्यक्रमे परिसरीयच्छात्रैः श्रीमातावैष्णोदेवीगुरुकुलात् समागतैः छात्रैश्च प्रतिभागिरुपेण भागो गृहीतः। अत्र वेदव्याकरणयोः शास्त्रीयस्पर्धायां निर्णायकत्वेन डॉ. करुणा आर्या, व्याख्यात्री, संस्कृतविभागः, दिल्लीविश्वविद्यालयः, समागता आसीत्। एवञ्च साहित्यशास्त्रीयस्पर्धायाः निर्णायकाः वेदव्यासपरिसरात् समागताः तत्रत्याः साहित्यविभागाध्यक्षाः डॉ. सुज्ञानकुमारमाहन्तिवर्याः, ज्योतिषशास्त्रीयस्पर्धायाश्च निर्णायकाः वेदव्यासपरिसरस्यैव ज्योतिषविभागस्य अध्यक्षाः डॉ. पी.वी.बी. सुब्रह्मण्यम्वर्याः उपस्थिताः आसन्।

समग्रस्यास्य कार्यक्रमस्य सञ्चालनं संयोजनञ्च, डॉ. सच्चिदानन्दशर्मवर्येण कृतम्। सह-संयोजनं डॉ. डी. दयानाथवर्येण, डॉ- कृष्णमुरारिमणित्रिपाठिमहोदयेन संयुक्तरुपेण कृतम्।

**केन्द्रीयविद्यालयसङ्घटनस्य शिक्षकाणां कृते आयोजितस्य प्रशिक्षणकार्यक्रमस्य समापनम्-**

श्रीरणवीरपरिसरे ०२.०१.२०१८ दिनाङ्के केन्द्रीयविद्यालयस्य शिक्षकाणां कृते आयोजितस्य आवासीयप्रशिक्षणवर्गस्य समापनमभवत्। परिसरप्राचार्यस्य प्रो. लोकमान्यमिश्रवर्यस्याध्यक्ष्ये आयोजितेऽस्मिन् कार्यक्रमे मुख्यातिथित्वेन जम्मूस्थस्य केन्द्रीयविश्वविद्यालयस्य कुलपतिः प्रो.अशोक एमामहोदयः उपस्थितः आसीत्। २४.१२.२०१७ दिनाङ्कात् ०२.०१.२०१८ दिनाङ्कपर्यन्तं आयोजितेऽस्मिन् प्रशिक्षणकार्यक्रमे केन्द्रीयविद्यालयस्य पञ्चाशत् शिक्षकाः भागं गृहीतवन्तः। प्रशिक्षकत्वेन च प्रो. सुदेशकुमारशर्मा, प्राचार्यः मुम्बईपरिसरः, डॉ. सुमनप्रसादभट्टः, सहाचार्यः, उत्तराखण्डसंस्कृतविश्वविद्यालयः, डॉ. प्रमोदबटोलिया, लखनऊपरिसरः, डॉ. लक्ष्मीनारायणः, लखनऊपरिसरः, डॉ. प्रकाशपन्तः सहाचार्यः, उत्तराखण्डसंस्कृतविश्वविद्यालयः, डॉ. राजेन्द्रमिश्रः, जम्मूविश्वविद्यालयः, डॉ. मदनकुमारझा, पुरीपरिसरः, डॉ.मदनसिंहः, डॉ. तेजनाथपौडेलः, डॉ. हरिशङ्करपाण्डेयः, डॉ. धनेशकुमारपाण्डेयः, डॉ. डी.दयानाथः, श्रीविशालमहाजनः, श्रीसहदेवसिंहादयः परिसरीयाः अध्यापकाः भागं गृहीतवन्तः। आधुनिकविभागाध्यक्षस्य डॉ.शरत्चन्द्रशर्मणः संयोजकत्वे आयोजितेऽस्मिन् कार्यक्रमे अतिथीनां स्वागतं डॉ. तेजनाथपौडेलवर्येण, धन्यवादज्ञापनं डॉ. हरिशङ्करपाण्डेयवर्येण कार्यक्रमस्य सञ्चालनञ्च डॉ. मदनसिंहमहोदयेन कृतम्।

**स्थानान्तरणं पदभारगृहणञ्च -**

१६.०१.२०१८ दिनाङ्के परिसरेऽस्मिन् प्रभारिप्राचार्यत्वेन कार्यभारं निर्वहतः प्रो. लोकमान्यमिश्रवर्यस्य स्थानान्तरणं लखनऊपरिसरेऽभवत्। तस्य स्थाने च जयपुरपरिसरस्य शिक्षाशास्त्रविभागात् समागतेन प्रो.फतहसिंहमहोदयेन प्रभारिप्राचार्यत्वेन पदभारः गृहीतः।

**सरस्वतीपूजनम् -**

२२.०१.२०१८ दिनाङ्के श्रीरणवीरपरिसरे बसन्तपञ्चम्यां तिथौ सरस्वतीपूजनोत्सवः सम्पन्नः। कार्यक्रमोऽयम् आधुनिकविभागाध्यक्षस्य डॉ.शरत्चन्द्रशर्मणः आध्यक्ष्ये आयोजितः। अस्मिन् पुण्यावसरे परिसरीयाः अध्यापकाः छात्राः कर्मचारिणश्चोपस्थिताः आसन्।

**राष्ट्रियमतदातृदिवसः -**

भारतसर्वकारस्यादेशानुसारं मुख्यालयेन प्राप्तसूचनामाधारीकृत्य श्रीरणवीरपरिसरे २५ जनवरी २०१८ दिनाङ्के राष्ट्रियमतदातृदिवसः सोत्साहमायोजितः। अवसरेऽस्मिन् परिसरस्य प्रभारिप्राचार्यस्योपस्थितौ परिसरीयैः अध्यापकैः छात्रैः कर्मचारिभिश्च निष्पक्षमतदानाय शपथं गृहीत्वा भारतीयसंविधानं प्रजातन्त्रं च प्रति आस्था प्रकटिता। कार्यक्रमस्यास्य संयोजनं डॉ.योगेन्द्रकुमारदीक्षितवर्येण कृतम्।



शपथं स्वीकुर्वाणाः परिसरसदस्याः

**गणतन्त्रदिवसस्यायोजनम्**

२६.०१.२०१८ दिनाङ्के श्रीरणवीरपरिसरे गणतन्त्रदिवसस्यायोजनं महतोत्साहेन कृतम्। अस्मिन् अवसरे परिसरस्य प्राचार्येण डॉ. फतहसिंहवर्येण स्वकीये उद्बोधने भारतीयगणतन्त्रं प्रति निष्ठायै छात्रेभ्यः प्रेरणा प्रदत्ता । परिसरस्य सर्वे अध्यापकाः कर्मचारिणः छात्राश्चात्र उपस्थिताः आसन्।

**अन्ताराष्ट्रियमातृभाषादिवसः**

फरवरीमासस्य एकविंशतिदिनाङ्के परिसरेऽस्मिन् अन्ताराष्ट्रियमातृभाषादिवसस्योपलक्ष्य विशिष्टः कार्यक्रमः आयोजितः। कार्यक्रमेऽस्मिन् परिसरीयैः सर्वैः अध्यापकैः स्वीयां मातृभाषामवलम्ब्य महतोत्साहेन भागः गृहीतः। अत्र साहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूरवर्येण पञ्जाबीभाषामाश्रित्य, ज्योतिषविभागाध्यक्षेण डॉ. प्रभातकुमारमहापात्रेण उडियाभाषामवलम्ब्य छात्राणामुद्बोधनं कृतम्। अवसरेऽस्मिन् छात्राणां कृते गीतनिबन्धचित्रनिर्माणादयः विविधाः स्पर्धाः आयोजिताः। यत्र खलु हिन्दी, डोगरी, भोजपुरी, पञ्जाबी, उडिया, असमिया, मराठी, बङ्गाली, हरियाणवी, बघेलखण्डी, चेत्याद्यः भाषाः अवलम्ब्य छात्राः भागं गृहीतवन्तः। परिसरप्राचार्यस्याध्यक्ष्ये सञ्चालितेऽस्मिन् कार्यक्रमे स्वागतभाषणं डॉ. दयानिधिशर्मवर्येण धन्यवादज्ञापनञ्च ज्योतिषविभागाध्यक्षेण डॉ. प्रभातकुमारमहापात्रवर्येण कृतम्। अस्य कार्यक्रमस्य सञ्चालनं डॉ. सञ्जयकुमारमिश्रवर्यः अकरोत्। कार्यक्रमस्यान्ते पुरस्कारवितरणं कृत्वा विविधासु स्पर्धासु विजेतृणां छात्राणां सम्माननमपि प्राचार्येण कृतम्।

**ज्योतिषविभागीया विशिष्टव्याख्यानमाला**

०७.०३.२०१८ दिनाङ्के पूर्वाह्ने परिसरे ज्योतिषविभागीयविशिष्टव्याख्यानमाला आयोजिता। कार्यक्रमेऽस्मिन् विशिष्टवक्तृत्वेन देहलीस्थश्रीलालबहादुरशास्त्रिसंस्कृतविद्यापीठात् समागतेन डॉ. देवीप्रसादत्रिपाठिवर्येण 'वास्तुशास्त्रम्' इति विषयमवलम्ब्य विशिष्टं व्याख्यानमुपस्थापितम्। कार्यक्रमस्याध्यक्ष्यं परिसरस्य प्रभारीप्राचार्येण आधुनिकविभागाध्यक्षेण डॉ. शरत्चन्द्रशर्मवर्येण कृतम्। सञ्चालनं डॉ. निगमपाण्डेयवर्येण, अतिथीनां स्वागतं कार्यक्रमस्य संयोजनञ्च ज्योतिषविभागाध्यक्षेण डॉ.प्रभातकुमारमहापात्रेण कृतम्। डॉ. रतनकुमारपाण्डेयः धन्यवादं व्यज्ञापयत्।

**साहित्यविभागीया विशिष्टव्याख्यानमाला**

०७.०३.२०१८ दिनाङ्के अपराह्णे द्विवादने साहित्यविभागीया विशिष्टव्याख्यानमाला समारभत। अस्मिन् कार्यक्रमे श्रीरणवीरपरिसरस्य प्राचार्यचरः, सम्प्रति च कटरास्थस्य वैष्णोदेवीश्राइनबोर्डगुरुकुलस्य निदेशकः, राष्ट्रपतिसम्मानितः प्रो. विश्वमूर्तिशास्त्रिवर्यः विशिष्टवक्तृत्वेन समागतः आसीत्। प्रो. विश्वमूर्तिशास्त्रिणा 'काव्यशास्त्रे गुणविमर्शः' इति विषयमवलम्ब्य स्वकीयं व्याख्यानं प्रस्तुतम्। अयं कार्यक्रमः परिसरस्य प्रभारिप्राचार्यस्य आधुनिकविभागाध्यक्षस्याध्यक्ष्ये सम्पन्नः। कार्यक्रमस्य संयोजनं साहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूरवर्येण कृतम्। साहित्यविभागीयः अध्यापकः श्रीअनमोलशर्मा कार्यक्रमस्य सञ्चालनं कृतवान्। अतिथीनां स्वागतं विभागीयाध्यापकेन डॉ.तेजनाथपौडेलेन, धन्यवादज्ञापनञ्च डॉ. नीतूशर्मणा कृतम्। अस्मिन् कार्यक्रमे विशिष्टव्याख्यानातिरिक्तं साहित्यविभागीयपरियोजनान्तर्गतं प्रसिद्धडोगरी- उपन्यासकारेण श्रीइन्दरजीतकेसरेण सह एकं परिचर्चासत्रमपि आयोजितम्। अस्मिन् सत्रे साहित्यपरियोजनायाः प्रधानान्वेषकेन साहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूरवर्येण 'मातरेआं' इति डोगरीउपन्यासस्य संस्कृतरूपान्तरणस्य



प्रो. विश्वमूर्तिशास्त्रिवर्याणां सम्माननम्

प रि स र वा र्ता

केचन अंशाः अपि उपस्थापिताः।

**वेदविभागीया विशिष्टव्याख्यानमाला**

१५.०३.२०१८ दिनाङ्के परिसरे वेदविभागेन विशिष्टव्याख्यानमालायाः आयोजनं कृतम्। अत्र मुख्यवक्तृत्वेन देहलीस्थ-राष्ट्रियसंस्कृतसंस्थानमुख्यालयात् वेदविभागाध्यक्षः प्रो. मनोजकुमारमिश्रवर्यः समागतः आसीत्। प्रो. मिश्रेण 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति विषयमवलम्ब्य स्वकीयं व्याख्यानं प्रस्तुतम्। कार्यक्रमस्यास्याध्यक्ष्यं परिसरप्राचार्येण प्रो. फतहसिंहवर्येण कृतम्। कार्यक्रमस्य सञ्चालनं वेदविभागीयाचार्येण डॉ. डी.दयानाथवर्येण कृतम्। डॉ. धनेशकुमारपाण्डेयवर्यः अतिथीनां स्वागतं कृतवान्। डॉ. दीपककुमारशर्मवर्यश्च धन्यवादं व्यज्ञापयत्।

**आधुनिकविभागीया विशिष्टव्याख्यानमाला**

२६.०३.२०१८ दिनाङ्के श्रीरणवीरपरिसरे आधुनिकविभागस्य विशिष्टव्याख्यानमालायाः आयोजनमभवत्। अत्र विशिष्टवक्तृत्वेन जम्मूविश्वविद्यालयस्य प्रबन्धनविभागात् डॉ. राजेन्द्रमिश्रमहाभागः समागतः आसीत्। डॉ. राजेन्द्रमिश्रवेर्यण "Sound and its influence on Human Health, Environment an Spirituality" इत्यस्मिन् विषये स्वकीयं व्याख्यानमुपस्थापितम्। कार्यक्रमस्याध्यक्ष्यं परिसरप्राचार्येण प्रो. फतहसिंहेन कृतम्। स्वागतम् आधुनिकविभागाध्यक्षेण डॉ. शरत्चन्द्रशर्मवर्येण, धन्यवादज्ञापनं च श्रीमतीनिर्मलगुप्तवर्यया कृतम्। कार्यक्रमस्य सञ्चालनं राजनीतिशास्त्रस्य व्याख्यात्रा डॉ. योगेन्द्रकुमारदीक्षितवर्येण कृतम्।

**कार्यशालायां भागग्रहणम्**

श्रीरणवीरपरिसरस्य ज्योतिषविभागाध्यक्षेण डॉ. प्रभातकुमारमहापात्रवर्येण, साहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूरमहाभागेन, दर्शनविभागस्य व्याख्यात्रा डॉ. आशीषत्रिपाठिवर्येण व्याकरणविभागस्य व्याख्यात्रा डॉ. विजयपयासीमहाभागेन च १५.०३.२०१८ दिनाङ्कतः २४.०३.२०१८ दिनाङ्कपर्यन्तं श्रृङ्गेरीपरिसरे समायोजितायां दूरस्थशिक्षकप्रशिक्षणकार्यशालायां भागः गृहीतः।

**द्विदिवसीया राष्ट्रियदर्शनसङ्गोष्ठी**

मार्चमासस्य २७-२८ दिनाङ्कयोः परिसरस्य सर्वदर्शनविभागेन वाणीविलाससभागारे 'मोक्षस्वरूपविचारः' इति विषयमभिलक्ष्य द्विदिवसीया राष्ट्रियसङ्गोष्ठी समायोजिता। परिसरप्राचार्यस्य आध्यक्ष्ये आयोजितायाम् अस्यां सङ्गोष्ठ्यां प्रथमदिवसे उद्घाटनसत्रे सारस्वतातिथित्वेन श्रीमातावैष्णोदेवीविश्वविद्यालयात् डॉ. अनिलतिवारीमहाभागाः समागताः आसन्। देहलीस्थश्रीलाल-बहादुरशास्त्रिसंस्कृतविद्यापीठात् प्रो. प्रभाकरप्रसादाः विशिष्टातिथित्वेन, देवप्रयागस्थश्रीरघुनाथकीर्तिपरिसरस्य प्राचार्याः प्रो. के.बी. सुब्बारायुडुवर्याश्च मुख्यातिथित्वेन उपस्थिताः आसन्। अस्मिन्नुद्घाटनसत्रे आध्यक्ष्यं परिसरस्य प्रभारिप्राचार्येण प्रो. फतहसिंहमहोदयेन कृतम्। सञ्चालनञ्च सर्वदर्शनविभागीयाध्यापकेन डॉ. कृष्णमुरारीमणित्रिपाठिवर्येण कृतम्। अतिथीनां स्वागतं डॉ. हरिशङ्करपाण्डेयमहोदयेन, धन्यवादज्ञापनञ्च डॉ. निगमपाण्डेयवर्येण कृतम्।

सङ्गोष्ठ्याः समापनसत्रे च सारस्वतातिथित्वेन डॉ. वरुणत्रिपाठिवर्याः, विशिष्टातिथित्वेन प्रो. रामसेवकदूबेवर्याः (आचार्याः संस्कृतविभागः इलाहाबादविश्वविद्यालयः), मुख्यातिथित्वेन च प्रो. के.बी. सुब्बरायुडुवर्याः उपस्थिताः आसन्। प्राचार्यस्याध्यक्ष्ये आयोजितेऽस्मिन् समापनसत्रे सञ्चालनं डॉ. आशीषत्रिपाठिवर्येण कृतम्। स्वागतं डॉ. हरिशङ्करपाण्डेयमहोदयेन, धन्यवादज्ञापनञ्च सर्वदर्शनविभागाध्यक्षेण डॉ. घनश्याममिश्रवर्येण कृतम्।

द्विदिवसीयामस्यां सङ्गोष्ठ्यां पञ्चसत्राणि आयोजितानि। तत्र सत्राध्यक्ष्यं क्रमशः प्रो. के.बी. सुब्बरायुडुवर्येण, प्रो. प्रभाकरप्रसादवर्येण, प्रो. रामसेवकदूबेमहाभागेन, डॉ. श्रीराम ए. एस्. व्याख्याता, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति, डॉ. अजयकुमारसिंहवर्येण (व्याख्याता केन्द्रीयविश्वविद्यालयः, जम्मूः, कृतम्। एवञ्च सञ्चालनं क्रमशः डॉ. प्रमोदशुक्लवर्येण डॉ. दीपककुमारशर्ममहोदयेन, डॉ. विजयपयासीवर्येण कृतम्। सङ्गोष्ठ्यामस्यां दिवसद्वये शिक्षकैः छात्रैश्च ४२ शोधपत्राणि वाचितानि। समग्रस्यास्य कार्यक्रमस्य संयोजनं सर्वदर्शनविभागाध्यक्षेण डॉ. घनश्याममिश्रवर्येण कृतम्।

**साहित्यविभागीयपरियोजनायाः सम्पन्नता**

३१.०३.२०१८ दिनाङ्के 'मातरेआं' नामकस्य डोगरी-उपन्यासस्य "विमाता" नाम्ना संस्कृतरूपान्तरणम् इति साहित्यविभागीय-लघुपरियोजनायाः कार्यं सम्पन्नतामगात्। अस्यां परियोजनायां प्रधानान्वेषकेण साहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूरवर्येण उपन्यासस्य संस्कृतानुवादो व्यधायि। साहित्यविभागीयप्राध्यापकाभ्यां डॉ.नीतूशर्मणा, डॉ.तेजनाथपौडेलेन च सहान्वेषकत्वेन यथायथं दायित्वनिर्वाहो विहितः।

# एकलव्यपरिसरवार्ता



सतर्कताजागरुकतासप्ताहाचरणस्य दृश्यम्

**सतर्कताजागरूकतासप्ताह:**

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य निर्देशानुगुणं एकलव्यपरिसरे ३०.१०.२०१७ त: ०४.११.२०१७ पर्यन्तं सतर्कता-जागरूकता-सप्ताह: समाचरित:। तत्र ३०.१०.२०१७ तमे दिनाङ्के समायोजिते उद्घाटनसमारोहे व्याकरणविभागाध्यक्षा: आचार्या: धनीन्द्रकुमारझावर्या: ऋजुमार्गेण अर्जितधने एवास्माकमधिकार: इति चिन्तयन्त: कार्यं कुर्मश्चेत् भ्रष्टाचारं निर्मूलयितुं शक्नुम: इति अब्रुवन्। सभाध्यक्षा: साहित्यविभागाध्यक्षा: आचार्यसच्चिदानन्दतिवारिवर्या: निष्कामभावनया राष्ट्रियैकताभावनया च जना: जागरूका: सन्त: प्रवर्तन्ते चेद् भ्रष्टाचारस्य निवारणं भविष्यतीति प्रत्यपादयन्। कार्यक्रमे शिक्षाशास्त्रविभागाध्यक्षा: आचार्या: बच्चाभारतीमहोदया:, शिक्षाशास्त्रविभागस्य वरिष्ठाध्यापका: डा. रमाकान्तमिश्रवर्या: सभ्यान् उद्बोधितवन्त:। श्रीअजयकुमारगन्धामहोदयेन सभा सञ्चालिता। डा.मञ्जुठेमदेवमहोदयया वन्दनार्पणं कृतम्। सतर्कता-जागरूकता-सप्ताहमुपलक्ष्य छात्रेभ्य: नैका: स्पर्धा: आयोजिता: आसन्। घोषवाक्यनिर्माणं, भाषणस्पर्धा, वादविवादस्पर्धा, प्रबन्धस्पर्धायां च छात्रा: सोत्साहेन भागमग्रहीषु:।

०३.११.२०१७ तमे दिनाङ्के अस्य समापनसमारोह: समनुष्ठित:। परिसरप्राचार्याणाम् आचार्यरञ्जितकुमारबर्मन्महोदयानाम् आध्यक्षे प्रवृत्ते कार्यक्रमेऽस्मिन् आचार्या: बच्चाभारतीमहोदया: सर्वेभ्य: स्वागतमकार्षु:। मुख्यातिथिरूपेण त्रिपुराराज्यस्य उच्चन्यायालयस्य न्यायाधीशचरा: श्रीमन्त: विनयभूषणभट्टाचार्यवर्या: समागत्य कथं मनुष्य: अनैतिककार्येषु उद्युक्तो भवति। कश्च तस्य परिहार: भवितुमर्हतीति व्याख्यानमदद्ु:। कार्यक्रमे साहित्यविभागाध्यक्षा: आचार्यसच्चिदानन्दतिवारिवर्या: अन्ये च विभागाध्यक्षा:, आचार्या:, परिसरप्राध्यापका:, छात्रा: उपस्थिता: आसन्। कार्यक्रमस्य संयोजक: श्रीअजयकुमारगन्धा, सहसंयोजिका डा. मञ्जुठेमदेव: च आसीत्।



एकतादिवसमुपलक्ष्य समायोजितायाः शोभायात्रायाः दृश्यम्

**राष्ट्रियैकतादिवस:**

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य निर्देशानुगुणम् एकलव्यपरिसरे सरदारवल्लभभाईपटेलमहोदयस्य जयन्त्युपलक्ष्य ३१.१०.२०१७ दिनाङ्के राष्ट्रियैकतादिवससमारोह: समाचरित:। परिसरप्राचार्याणाम् आचार्यरञ्जितकुमार-बर्मन्महोदयानाम् आध्यक्षे प्रवृत्ते कार्यक्रमेऽस्मिन् आचार्या: बच्चाभारतीमहोदया: सर्वेभ्यो स्वागतमकार्षु:। मुख्यातिथिरूपेण अगरतलास्थराजकीयमहिलामहाविद्यालयस्य राजनीतिविज्ञानविभागस्य सहाचार्या डा. रीना दत्तामहोदया सरदारपटेलमहोदयस्य व्यक्तित्वमधिकृत्य राष्ट्रियैकताविषये उद्बोधितवन्त:। कार्यक्रमे साहित्यविभागाध्यक्षा: आचार्यसच्चिदानन्दतिवारिवर्या: अन्ये च विभागाध्यक्षा:, आचार्या:, परिसरप्राध्यापका:, छात्रा: उपस्थिता: आसन्। कार्यक्रमस्य संयोजक: डा.ऋषिराज: आसीत्।

कार्यक्रममुपलक्ष्य परिसराध्यापकानां कृते राष्ट्रियैकताभिवर्धने माननीयसरदारवल्लभभाईपटेलमहोदयस्य योगदानम्' इति विषये संगोष्ठी समायोजिता आसीत्। कार्यक्रममुपलक्ष्य परिसरीयच्छात्रेभ्य: ३०.१०.२०१७ तमे दिनाङ्के 'अखण्डभारतनिर्माणे सरदारवल्लभभाईपटेलमहोदयानां योगदानम्' इति विषयमधिकृत्य निबन्धलेखनस्पर्धा च समायोजिता।

**नाट्यप्रशिक्षणकार्यशाला**

नवम्बरमासस्य १ दिनाङ्कत: १५ दिनाङ्कं यावत् एकलव्यपरिसरे नाट्यप्रशिक्षणकार्यशाला प्रो.सच्चिदानन्दतिवारिवर्याणां समन्वयकत्वे समायोजिता। कार्यशालायामस्याम् अभिनयस्य प्रशिक्षणं प्रदातुम् अस्सामत: श्रीमन्त: प्राञ्जल सैक्य तथा श्रीमन्त: विद्युतमहोदयाश्च समाहूता: आसन्। अस्यां कार्यशालायाम् एकलव्यपरिसरस्य २५ छात्रै: भाग: गृहीत:। अस्या: कार्यशालाया: व्यवस्थासंयोजकरूपेण डा.अरुणकुमार:, डा. मञ्जूठेमदेव:, डा. दीपकुमार:, डा. महेशकुमारपाणिग्रही, डा. उत्तमसिंह: च कार्यमकुर्वन्।

**नाट्यमहोत्सवे एकलव्यपरिसरेण प्राप्ता: पुरस्कारा:**

नाट्यमहोत्सवे एकलव्यपरिसरेण राघवाभ्युदयम् इति नाटकं प्रस्तुतम्। स्पर्धायामस्यां परिसरेण प्रोत्साहनपुरस्कार: सर्वोत्कृष्टप्रकाशव्यवस्थापुरस्कारश्च परिसरेण प्राप्त:।

# वेदव्यासपरिसरवार्ता

## अद्वैतवेदान्तराष्ट्रियसङ्गोष्ठी

अद्वैतवेदान्तविभागेन 11-11-2017, 12-11-2017 दिनाङ्कयोः श्रीमद्भगवद्गीतातत्त्वम् : विश्वस्य वातायनम् इति विषये राष्ट्रियसङ्गोष्ठी समायोजिता। सङ्गोष्ठ्यामस्यां परिसरस्य पूर्वप्राचार्यः आचार्यः रामनारायणदासवर्यः, वाराणसीतः निवृत्ता: आचार्या: की.पी. पाठकवर्याः, श्रीलालबहादूरशाशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य सहाचार्यः डा जयकृष्णन्वर्यः च संसाधकरूपेण उपस्थिताः आसन्। परिसरप्राचार्याः प्रो. लक्ष्मीनिवासपाण्डेयवर्याः सङ्गोष्ठ्याः अस्याः अध्यक्षाः आसन्। सङ्गोष्ठाः अस्याः संयोजनं अद्वैववेदान्तविभागस्य विभागाध्यक्षः डा.भगवान् सामन्तरायवर्यः अकरोत्। सङ्गोष्ठ्यामस्यां बाह्यप्रतिभागिनः परिसरीयप्राध्यापकाः शोधच्छात्राश्च शोधपत्राणी प्रास्तुवन्।




राज्यस्तरीयशास्त्रीयस्पर्धाकार्यक्रमे निर्णायकान् सम्मानयति प्राचार्यः

## राज्यस्तरीयशास्त्रीयभाषणस्पर्धा

अखिलभारतीयशास्त्रीयभाषणस्पार्धासु हिमाचलप्रदेशस्य प्रतिभागिनां चयनार्थं राज्यस्तरीयशास्त्रीयभाषणस्पर्धाः परिसरेण 1-12-2017, 2-12-2017 दिनाङ्कयोः समायोजिताः। तत्र निर्णायकाः प्रो. हरेरामत्रिपाठिवर्यः, प्रो. भागीरथीनन्दवर्यः, डा. बिहारीलालवर्यः, डा. रामसलाहीद्विवीदिवर्यश्च आसन्। स्पर्धासु परिसरच्छात्राः हिमाचलप्रदेशस्य विभिन्नेभ्यः महाविद्यालयेभ्यः, गुरुकुलेभ्यः च छात्राः भागमगृह्णन्। स्पर्धानां संयोजनं ज्योतिषविभागध्यक्षः डा. पी.वी. बी. सुब्रह्मण्यम्, वेदान्तविभागध्यक्षः डा. भगवानसामन्तरयः च अकुरुताम्।

## गीताजयन्तीकार्यक्रमः

गीताजयन्तीमुपलक्ष्य परिसरेण 30-11-2017 दिनाङ्के गीताजयन्तीकार्यक्रमः समायोजितः। आदौ परिसरीयप्राध्यापकाः छात्राश्च सम्पूर्णगीतायाः पठनमकुर्वन्। तदनु अध्यापकाः गीतायाः प्रासङ्गिकतायाः विषये छात्रान् उद्बोधितवन्तः। तदनु छात्राः गीतामधिकृत्य स्वीयान् विचारान् प्रास्तुवन्। अस्मिन् कार्यक्रमे परिसरस्य प्राध्यापकाः डा. पी.वी.बी. सुब्रह्मण्यम्, डा. सुज्ञानकुमारमहान्ती, डा. नरेशशर्मा, डा.एन्. सुब्रह्मण्यन्, डा. वासुमोहनः, डा. के. श्रीसमीरजा अन्ये च प्राध्यापकाः परिसरीयच्छात्राश्च भागमगृह्णन्। अस्य संयोजनं अद्वैववेदान्तविभागस्य विभागाध्यक्षः डा.भगवान् सामन्तरायवर्यः अकरोत्।




गीताजयन्तीकार्यक्रमस्य चित्रम्

## रङ्गमञ्चप्रशिक्षणकार्यशाला

परिसरीयच्छात्राणाम् आभिनयकौशलविकासार्थं परिसरे 25-10-2017 दिनाङ्कात् 18-11-2017 दिनाङ्कं यावत् रङ्गमञ्चप्रशिक्षणकार्यशाला समायोजिता। अस्यां कार्यशालायां भारतेन्दुनाट्यअकादमी, लखनऊतः श्रीअनिलकुमारचौधरी, श्रीविनोदशर्मा च परिसरच्छात्रेभ्यः प्रशिक्षणं दत्तवन्तौ। अस्याः कार्यशालायाः समन्वयनं डा. श्रीमनोजश्रीमालः, डा. पुरुषोत्तमश्च अकुरुताम्।

## नाट्यमहोत्सवे नाटकप्रस्तुतिः

अगर्तलायां 22-11-2017 दिनाङ्कात् 24-11-2017 दिनाङ्कं यावत् रष्ट्रियसंस्कृतसंस्थानस्य अन्तःपरिसरीयनाट्यमहोत्सवे परिसरच्छात्रैः उदात्तराघवस्य मञ्चनम् कृतम्। तत्र परिसरीयच्छात्राः गौरवः, जीवनः, केवलश्च क्रमशः प्रथम-द्वितीय-तृतीयपुरस्कारान् प्राप्तवन्तः । नाटकस्य निदेशनं डा. मनोजश्रीमालः, डा. पुरुषोत्तमश्च अकुरुताम्।

## अखिलभारतीय-अन्तर्विश्वविद्यालयीयशारीरिकक्रीडास्पर्धासु भागग्रहणम्

परिसरीयच्छात्राः विभिन्नासु अखिलभारतीय-अन्तर्विश्वद्यालीयस्पर्धासु भागमगृह्णन् । रोहतकमध्ये 09-11-2017 तः समायोजितायां मल्लयुद्धप्रतियोगितायां, 1-12-2017 तः 3-12-2017 पर्यन्तं समायोजितायां बैडमिंटनप्रतियोगितायां च परिसरीयच्छात्राः भागमगृह्णन् अत्र परिसरस्य शारीरिकशिक्षकः श्रीप्रियजितमहापात्रः छात्राणां मार्गदर्शनमकरोत्। 10-12-2017 तः 16-12-2017 पर्यन्तम् आचार्यनागर्जुनविश्वविद्यालयः, गुण्टूर, इत्यत्र समायोजितायां विभिन्नासु अथ्लेटिक्सस्पर्धासु भागमगृह्णन्।

**शिक्षाशास्त्रीयराष्ट्रियसङ्गोष्ठी**

"पर्यावरणशिक्षा संस्कृतञ्च" इति विषयमाश्रित्य शिक्षाशास्त्रविभागेन द्विदिवसीया शिक्षाशास्त्रीया राष्ट्रियसङ्गोष्ठी 4-2-2018, 5-2-2018 दिनाङ्कयोः समायोजिता। सङ्गोष्ठ्याः अस्य उद्घाटनसत्रे मुख्यातिथयः संस्थानस्य वेदव्यासपरिसरस्य लखनऊपरिसरस्य च पूर्वप्राचार्याः प्रो. सुरेन्द्रझामहोदयाः शिक्षायाः समसामयिकसमस्यानां निवारणे कर्तव्यानि प्रास्तुवन्। तत्रापि पर्यावरणसमस्यानां निवारणे संस्कृतसाहित्यस्य योगदानभूमिकां प्रत्यपादयन्। विशिष्टातिथयः ढलियारास्थितशिक्षकप्रशिक्षणमहाविद्यालयस्य प्राचार्याः डा. देवेन्द्रप्रसादशर्ममहोदयाः आसन्। समापनसत्रे मुख्यातिथयः प्रो.सुरेन्द्रझामहोदयाः राजकीयस्नातकोत्तरमहाविद्यालयस्य उपप्राचार्याः डा. वीणागौतममहोदयाः च उपस्थिताः आसन् । कार्यक्रमस्य आध्यक्ष्यं परिसरस्य प्रभारिप्राचार्याः डा. अशोकचन्द्रगौडमहोदयाः आसन्। सङ्गोष्ठ्याम् अस्याम् 5 शोधपत्रवाचनसत्रेषु 74 शोधपत्राणि प्रस्तुतानि।

**साहित्यशास्त्रीयविशिष्टव्याख्यानम्**

व्यञ्जना अनुमानञ्च इति विषयमाश्रित्य साहित्यविभागेन साहित्यशास्त्रीयविशिष्टव्याख्यानकार्यक्रमः 16-02-2018 दिनाङ्के समायोजितः। व्याख्यातारः तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य साहित्यविभागस्य आचार्याः प्रो.जि.एस्. आर्.कृष्णमूर्तिमहोदयाः कार्यक्रमस्य अध्यक्षाः परिसरप्राचार्याः प्रो.लक्ष्मीनिवासपाण्डेयमहोदयाः, संयोजकाः साहित्यविभागाध्यक्षाः डा. सुज्ञानकुमारमहान्तिवर्याः आसन्।

**साहित्यशास्त्रीयराष्ट्रियसङ्गोष्ठी**

फरवरीमासस्य 17, 18 दिनाङ्कयोः साहित्यविभागेन "विंशशताब्दीयसंस्कृतकाव्यानां काव्यशास्त्रीयसमीक्षणम्" इति विषयमाश्रित्य द्विदिवसीया राष्ट्रियसङ्गोष्ठी समायोजिता। अस्याः सङ्गोष्ठ्याः उद्घाटनसत्रे मुख्यातिथयः राष्ट्रियसंस्कृतविद्यापीठस्य आचार्याः प्रो. जि.एस्.आर्. कृष्णमूर्तिमहोदयाः, विशिष्टातिथयः काशीहिन्दूविश्वविद्यालयस्य आचार्याः प्रो. शिवरामशर्ममहोदयाश्च आसन्। प्रथमशोधसत्रस्य सत्राध्यक्षाः प्रो.जि.एस्.आर्. कृष्णमूर्तिमहोदयाः, द्वितीयशोधसत्रस्य सत्राध्यक्षाः प्रो. शिवरामशर्ममहोदयाः, तृतीयशोधसत्रस्य सत्राध्यक्षाः उत्तराखण्डसंस्कृतविश्वविद्यालयस्य सहायकाचार्याः डा. काञ्चनतिवारिमहोदयाः, चतुर्थशोधसत्रस्य सत्राध्यक्षाः डा.सुज्ञानकुमारमहान्तिवर्याः, पञ्चमशोधसत्रस्य सत्राध्यक्षाः डा. अशोकचन्द्रगौडशास्त्रिमहोदयाश्चासन्। 18-2-2018 दिनाङ्के समायोजितस्य समापनसत्रे पत्रप्रस्तोतृभ्यः प्रमाणपत्रवितरणं अतिथिभिः कारितम्। अस्याः सङ्गोष्ठ्याः अध्यक्षाः परिसरप्राचार्याः प्रो.लक्ष्मीनिवासपाण्डेयमहोदयाः, समन्वयकाः डा. सुज्ञानकुमारमहान्तिवर्याः आसन्। कार्यक्रमे आभारतात् समागताः प्राध्यापकशोधच्छात्राः परिसरस्य साहित्यविभागस्य समेऽपि प्राध्यापकाः अन्ये परिसरीयप्राध्यापकाः शोधाच्छात्राश्च गवेषणपूर्णशोधपत्राणि प्रास्तुवन्।

**अन्ताराष्ट्रियमहिलादिवसः**

परिसरे 8-3-2018 दिनाङ्के अन्ताराष्ट्रियमहिलादिवसकार्यक्रमः महिलाध्ययनकेन्द्रपक्षतः अनुष्ठितः। यत्र परिसरस्य समीपस्थानेषु शैक्षिक-सांस्कृतिक-राजनैतिक-सेवा-वैद्यादिक्षेत्रेषु तत्पराणां विभिन्नमहिलानां सम्माननं विहितम्। कार्यक्रमस्य अध्यक्षः प्रभारीप्राचार्यः डा. अशोकचन्द्रगौडशास्त्रिमहोदयः, संयोजिका डा.सगरिकानन्दमहोदया च आस्ताम्।

**आधुनिकविषयविभागीया राष्ट्रियसङ्गोष्ठी**

मार्चमासस्य 24, 25 दिनाङ्कयोः "भारतस्य सामाजिक-आर्थिकसांस्कृतिकविकासः - प्रगतिशीलविश्लेषणम्" इति विषयमाश्रित्य द्विदिवसीया राष्ट्रियसङ्गोष्ठी समायोजिता। सङ्गोष्ठ्याः अस्याः उद्घाटनं मुख्यातिथिः देहरा एस्.डी.एम् श्री धनवीरठाकूरमहोदयः अकरोत्। समापनसत्रस्य मुख्यातिथिः देहरास्थितस्य राजकीयस्नातकमहाविद्यालयस्य प्राचार्यः डा. अक्षितमिश्रः आसीत्। तथैव धर्मशलायां स्थितस्य केन्द्रीयविश्वद्यालयस्य सङ्गणकविभागस्य सहायकाचार्यः डा. अजयकुमारः, हमीरपुरस्थितस्य राजकीयस्नातकोत्तमहाविद्यालयस्य सहायकाचार्यः डा.मुकेशशर्ममहोदयः विभिन्नसत्रेषु सत्रध्याक्षाः अतिथयश्चासन्। सङ्गोष्ठ्याः अस्याः अध्यक्षाः परिसरप्राचार्याः प्रो. लक्ष्मीनिवासपाण्डेयमहोदयाः, संयोजकः डा. पूर्णचन्द्रमहापात्रमहोदयश्चासन्। कार्यक्रमेऽस्मिन् राष्ट्रस्य विभिन्नभागेभ्यः समागताः गवेषकाः परिसरीयाः प्राध्यापकशोधच्छात्राः शोधपत्राणि प्रस्तुतवन्तः।

**वार्षिकोत्सवः**

वेदव्यासपरिसरस्य ऐषमः वार्षिकोत्सवः 28-03-2018 दिनाङ्के समनुष्ठितः। कार्यक्रमस्य मुख्यातिथिः खण्डविकासाधिकारी श्रीओम्प्रकाशठाकुर्महोदयः विशिष्टातिथयः सेण्ट्रल् बैंक आफ् इण्डिया प्रागपुरशाखायाः मुख्यप्रबन्धकाः श्री अतुलअर्यवर्याः सारस्वतातिथयः श्रीहरेशगुलेरिमहोदयाः आसन्। वार्षिकोत्सवस्य शुभावसरे साहित्यविभागस्य परियोजनायाः प्रतिवेदनस्य विमोचनकार्यक्रमः अपि समनुष्ठितः अस्याः परियोजनायाः मुख्यगवेषकाः सहित्यविभागध्यक्षाः डा. सुज्ञानकुमारमहन्तिवर्याः। कार्यक्रमस्य अन्ते विभिन्नप्रतियोगितासु, राज्यस्तरीयराष्ट्रियप्रतियोगितासु परिसरस्य भागग्रहीतृणां छात्राणां कृते पुरस्कारवितरणकार्यक्रमः तदनु सांस्कृतिककार्यक्रमाश्चासन्।

### ज्योतिषशास्त्रीयराष्ट्रियसङ्गोष्ठी

शास्त्रान्तरेषु ज्योतिषवास्तुतत्त्वविमर्शः इत्यमुं विषयमाश्रित्य ज्योतिषविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी मार्चमासस्य 30,31 दिनाङ्कयोः समायोजिता। सङ्गोष्ठ्याः अस्याः मुख्यातिथिः वरणासीस्थितस्य काशीहिन्दूविश्वविद्यालयस्य आचार्याः प्रो. विनोदकुमारपाण्डेयाः, विशिष्टातिथिः जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य आचार्यः प्रो. विनोदकुमारशर्ममहोदयः, सारस्वतातिथिः संस्थानस्य भोपालपरिसरस्य सहायकाचार्यः डा. श्यामदेवमिश्रमहोदयश्चासन्। कार्यक्रमस्य उद्घाटनवासरे सङ्गोष्ठ्याः अध्यक्षाः परिसरप्राचार्याः प्रो. लक्ष्मीनिवासपाण्डेयमहोदयः ज्योतिषशास्त्रस्य प्रतिपादितवन्तः समसामयिकमहत्त्वविषयम्। सङ्गोष्ठ्याः अस्याः मार्गदर्शनं ज्योतिषविभागाध्यक्षेण डा.पी.वी.बी.सुब्रह्मणम्महोदयेन कृतम्। समन्वयनं डा. हरिनारायणधरद्विवेदिमहोदयेन कृतम्।

## भोपालपरिसरवार्ता

### शोधप्रस्तावलेखनकार्यशाला, अनुसन्धानोपकरणकार्यशाला च



कार्यशालायां मञ्चासीनाः अतिथिप्रमुखाः

शिक्षाशास्त्रविभागेन शिक्षाचार्यविद्यार्थिनां कृते १०-११ अक्टूबर, २०१७ दिनाङ्कयोः द्विदिवसीयायाः शोधप्रस्तावकार्यशालयायाः आयोजनं कृतम्। अस्यां प्रथमायां कार्यशालायां शिक्षाचार्यप्रथमद्वितीयकक्षयोः, विद्यावारिधिकक्षायाश्च विद्यार्थिनः प्रतिभागिनः आसन्। कार्यशालायां प्रो. गोपीनाथशर्ममहाशयाः, पूर्वशिक्षाविभागाध्यक्षाः, जगद्गुरूरामानन्दाचार्य-राजस्थानसंस्कृत-विश्वविद्यालयः, जयपुरम्, समागत्य दिनद्वयं विशिष्टव्याख्यानं प्रायोगिकावबोधञ्च दत्तवन्तः। पुनः विभागेन १२-१३ अक्टूबर, २०१७ दिनाङ्कयोः अनुसन्धानोपकरणनिर्माणकार्यशालायाः आयोजनं कृतम्। अस्यां कार्यशालायां नवदेहलीस्थ-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठतः प्रो. रमेशप्रसादपाठकः, डा. रजनी जोशी च विभिन्नानुसन्धानोपकरणानां, तन्निर्माणप्रक्रियायाः व्यावहारिकोपयोगिज्ञानं प्रतिपादितवन्तौ। कार्यशालाद्वयं भाविशोधाय महदुपकारीति अनुभूतम्।

### जैनदर्शनविभागीया राष्ट्रियशोधसङ्गोष्ठी




सङ्गोष्ठ्याः उद्घाटनकार्यक्रमस्य एकं दृश्यम्

परिसरस्य जैनविभागद्वारा अक्टोबरमासस्य २७-२८ दिनाङ्कयोः'संस्कृतसाहित्यसम्वर्धने जैनाचार्याणावदानम्'इति विषयेऽस्मिन्द्विदिवसीया राष्ट्रियसङ्गोष्ठी समायोजिता। २७ दिनाङ्के आयोजिते उद्घाटनसत्रस्य अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः डा. अनेकान्तजैनः, जैनदर्शनविभागाध्यक्षः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, चासीत्। आध्यक्षीयोद्बोधने परिसरप्राचार्येण जैनधर्मसाहित्ययोः विशिष्टस्थानम् उद्घाटितम्, तथैव डा. अनेकान्तजैनेन जैनाचार्याणां विपुलसाहित्यपरिचयः प्रदत्तः। सङ्गोष्ठ्याः संयोजकेन श्रीप्रतापशास्त्रिणा, समन्वयकेन डॉ. पङ्कजकुमारजैनमहोदयेन च जैनाचार्याणाम् अवदानाय प्रकाशनाय सङ्गोष्ठी एकः सार्थकोपक्रमः अनुभूतमिति प्रतिपादितम्। २८ दिनाङ्के आयोजिते सङ्गोष्ठ्याः समापनसत्रे अध्यक्षः परिसरस्य प्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः प्रो. जयकुमारजैनः, निदेशकः, देहलीस्थं वीरसेवामन्दिरञ्चास्ताम्। एतेषां विदुषां मार्मिकोद्बोधनं सर्वैरपि प्राप्तम्। धन्यवादज्ञापनं डा. नितिनजैनेन, कुशलसञ्चालनञ्च श्रीप्रतापशास्त्रिणा विहितम्।

### आधुनिकविषयविभागीया राष्ट्रियशोधसङ्गोष्ठी

'आधुनिक विषयों की प्रयोजनमूलकता'इति शीर्षकोपेता द्विदिवसीयायाः राष्ट्रियसङ्गोष्ठ्याः आयोजनम् आधुनिकविभागेन ओक्टुबरमासस्य २७-२८ दिनाङ्कयोःकृतम्। २७ दिनाङ्के आयोजिते उद्घाटनसत्रे अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः, सारस्वतातिथिः डा. नन्दनत्रिपाठी, विभागाध्यक्षः, सूचनाप्रौद्योगिकीविभागः, बरकत-उल्लाविश्वविद्यालयः, चास्ताम्। श्रीसुमितसक्सेनामहोदयेन अतिथीनां स्वागतं कृतम्। कार्यक्रमस्यान्ते डा. विवेकसिंहेन धन्यवादज्ञापनम्, डा. अर्चनाचौहानद्वारा च सङ्गोष्ठ्याः उद्घाटनसमारोहस्य कुशलसञ्चालनं कृतम्। २८ दिनाङ्के सङ्गोष्ठ्याः समापनसत्रस्य अध्यक्षः प्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः श्री तपनभौमिकः, अध्यक्षः, मध्यप्रदेशपर्यटनविभागः, सारस्वतातिथिः प्रो. रेखारायः चासन्। आयोजनस्य आरम्भे आधुनिकविभागाध्यक्षा डा. अर्चनादुबे स्वागतभाषण-संगोष्ठीप्रतिवेदनं च प्रस्तुतवती। सफीना-अंसारीद्वारा धन्यवादज्ञापनम्, डा. अवनिशर्मणा च सङ्गोष्ठ्याः समापनसमारोहस्य कुशलसञ्चालनं कृतम्।

**सतर्कताजागरूकतासप्ताहः**




सतर्कताजागरूकतासप्ताहकार्यक्रमस्य दृश्यम्

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे दिनाङ्कः ३० अक्टूबर, २०१७ तः ०४ नवम्बर, २०१७ पर्यन्तं सर्तकताजागरूकतासप्ताहः आयोजितः। अवसरेऽस्मिन् बरकत-उल्लाहविश्वविद्यालयस्य राष्ट्रियसेवायोजनायाः कार्यक्रमसमन्वयकः डा. अनन्तकुमारसक्सेना मुख्यातिथिरूपेण समागतः। सारस्वतातिथिः बरकतउल्लाहविश्वविद्यालयस्य राष्ट्रियसेवायोजनायाः मुक्त-एककस्य कार्यक्रमाधिकारी श्री राहुलसिंहपरिहारःआसीत्। कार्यक्रमसभाध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः आसीत्। अत्र प्राध्यापकेभ्यः, विद्यार्थिभ्यः, कर्मचारिभ्यश्च समस्तव्यवहारेषु सर्तकतायै प्रेरणा प्रदत्ता। अवसरेऽस्मिन् निबंध-पोस्टरमेंकिग-भाषणस्पर्धासु विजेतृविद्यार्थिनः पुरस्कृताः। कार्यक्रमे स्वागतभाषणं श्रीसुमितसक्सेनाद्वारा, धन्यवादज्ञापनं डा. कृष्णकान्ततिवारिद्वारा, कार्यक्रमसंचालनं डा मंजूसिंहद्वारा च कृतम्। कार्यक्रमसंयोजनं श्रीसुमितसक्सेना, डा. विवेकसिंहः, डा. मञ्जूसिंहः च कृतवन्तः।

**ज्योतिषविभागीया राष्ट्रियशोधसङ्गोष्ठी**




ज्योतिषसङ्गोष्ठ्यां मञ्चासीनाः अतिथिप्रमुखाः

भोपालपरिसरस्य ज्योतिषविभागेन 'ज्योतिषशास्त्रे रोगविचारः' इति विषयमवलम्ब्य नवम्बरमासस्य ०३-०४ दिनाङ्कयोः द्विदिवसीया राष्ट्रियसङ्गोष्ठी आयोजिता। ०३ दिनाङ्के अस्याः सङ्गोष्ठ्याः उद्घाटनसत्रे सत्रस्यास्य अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः प्रो. वासुदेवशर्मा च आसीत्। स्वागतभाषणं विभागाध्यक्षः प्रो. हंसधरझा प्रस्तुतवान्। सत्रस्य कुशलसञ्चालनं डा. श्यामदेवमिश्रः, डा. आशीषचौधरी च धन्यवादज्ञापनम् अकारि। समापनसत्रे सत्राध्यक्षः प्राचार्याः प्रो. एम्. चन्द्रशेखरवर्याः, मुख्यातिथिः डा. उपेन्द्रभार्गवश्च सभां सम्बोधितवन्तः। संगोष्ठ्यां ज्योतिषविभागाध्यक्षाः प्रो. हंसधरझाः स्वागतभाषणं, धन्यवादज्ञापनञ्च प्रस्तुतवान्। कार्यक्रमस्य सफलसञ्चालनं डा. अवधेशश्रोत्रियेन कृतम्। अस्यां संगोष्ठ्यां ७० शोधपत्राणि प्रस्तुतानि।

**साहित्यविभागीया राष्ट्रियशोधसंगोष्ठी**

साहित्यविभागद्वारा 'संस्कृतकाव्यशास्त्रे गुणाः' विषयेऽस्मिन् नवम्बरमासस्य ०३-०४ दिनाङ्कयोः द्विदिवसीया राष्ट्रियशोधसङ्गोष्ठी आयोजिता। ०३ दिनाङ्के समायोजिते उद्घाटनसत्रे सत्राध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः प्रो. क्षेत्रवासीपण्डा, सारस्वतातिथिः प्रो. रमाकान्तपाण्डेयः च समुपस्थिताः। कार्यक्रमस्यान्ते डॉ. अजयकुमारमिश्रेण धन्यवादः ज्ञापितः। सत्रस्यास्य सञ्चालनं डॉ. सनन्दनकुमारत्रिपाठिना कृतम्। ०४ दिनाङ्के समायोजिते समापनसत्रस्य अध्यक्षः प्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः प्रो. राधावल्लभत्रिपाठी, सारस्वतातिथिश्च प्रो. तुलसीदासपरौहा च आसन्। सङ्गोष्ठ्याः डॉ. अजयकुमारमिश्रेण प्रतिवेदनं प्रस्तुम्। डा. धर्मेन्द्रसिंहदेवेन संगोष्ठ्याः कुशलसञ्चालनं कृतम्। अस्यां संगोष्ठ्यां ५० शोधपत्राणि प्रस्तुतानि।

**व्याकरणविभागीया राष्ट्रियशोधसङ्गोष्ठी**




व्याकरणसङ्गोष्ठ्यां मञ्चासीनाः प्राचार्याः अतिथयश्च

द्विदिवसीया राष्ट्रियशोधसङ्गोष्ठी नवम्बरमासस्य १०-११ दिनाङ्के आयोजिता। १० दिनाङ्के आयोजितोद्घाटनसत्रस्य अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः प्रो. रामसागरमिश्रः, भूतपूर्वाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, लखनऊ-परिसरः चास्ताम्। अतिथिपरिचयः, विषयप्रवर्तनञ्च प्रो. सुबोधशर्मद्वारा विहितम्। व्याकरणसंगोष्ठ्यां श्री आस्तीकद्विवेदी धन्यवादज्ञापनं, डा. प्रदीपपाण्डेयः सञ्चालनञ्च कृतवान्। व्याकरणसंगोष्ठ्याः समापनकार्यक्रमे मुख्यातिथिः प्रो. बोधकुमारझा, आचार्यः राष्ट्रियसंस्कृतसंस्थानम्, मुम्बईपरिसरः आसीत्। प्रो. सुबोधशर्मद्वारा स्वागतवचनं, संगोष्ठीप्रतिवेदनं च प्रस्तुते। धन्यवादज्ञापनं डा. आस्तीकद्विवेदिद्वारा, मञ्चसञ्चालनञ्च डा. कैलाशचन्द्रदासेन कृतम्। अस्याः व्याकरणसंगोष्ठ्याः समन्वयकः प्रो. सुबोधशर्मा, सचिवश्च डा. कैलाशचन्द्रदासश्चास्ताम्।

**शिक्षाशास्त्रविभागीया राष्ट्रियशोधसङ्गोष्ठी**

'शिक्षणाधिगमप्रक्रियायै सूचनासम्प्रेषणप्रविधिः' इति विषयमाधृत्य शिक्षाविभागेन फरवरिमासस्य ११, १२ दिनाङ्कयोः द्विदिवसीया राष्ट्रियशोधसङ्गोष्ठी समाचरिता। फरवरिमासस्य ११ दिनाङ्के समाचरिते उद्घाटनसत्रे स्वागतभाषणं विभागाध्यक्षा प्रो. प्रभादेवीचौधरिमहोदयया

विहितम्। सत्रस्यास्य अध्यक्षः प्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः श्रीमहेश श्रीवास्तवः, उपाध्यक्षः, राष्ट्रियै एकतासमितिभोपालम्। प्रो. प्रभादेवी चौधरीद्वारा अतिथिपरिचयं, प्रो. जे. भानुमूर्तिद्वारा विषयप्रवर्तनं च विहितम्। अत्र धन्यवादज्ञापनं डा. नगेन्द्रनाथझाद्वारा, सञ्चालनं डा. पवनकुमारद्वारा विहितम्।

समापनसत्रे मुख्यातिथिः डा. देवेन्द्रदीपकः, मध्यप्रदेशग्रन्थ-अकादमी, भोपालम्, सारस्वतातिथिः डा. अमितापाण्डेयभारद्वाजः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली च आसीत्। अस्मिन् आयोजने प्रो. प्रभादेवीचौधरी स्वागतवाचनं, प्रो. जे. भानुमूर्तिः संगोष्ठीप्रतिवेदनं प्रस्तुतवान्। धन्यवादज्ञापनं डा. सोमनाथसाहुद्वारा, सञ्चालनं डा. श्रीगोविन्दपाण्डेयद्वारा च विहितम्। शिक्षाशास्त्रीयसंगोष्ठ्याः समन्वयकः प्रो. जे. भानुमूर्तिः, संयोजकः डा. नगेन्द्रनाथझाः, सचिवश्च डा. सोमनाथसाहुः चासन्।

**ज्योतिषशास्त्रस्य वैज्ञानिकता, वर्तमानसमये प्रासङ्गिकता च (द्विदिवसीया राष्ट्रियज्योतिषकार्यशाला)**

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य, पतञ्जलिसंस्कृतसंस्थानस्य च संयुक्ततत्त्वावधाने विशिष्टा कार्यशाला आयोजिता। कार्यशालायाः उद्घाटनसमारोहे माननीयः डा. कुंवरविजयशाहः, मन्त्री, विद्यालयशिक्षा, मध्यप्रदेशशासनम्, अध्यक्षश्च, महर्षिपतञ्जलिसंस्कृतसंस्थानम्, मुख्यातिथिरूपेण समुपस्थितः। सारस्वतातिथिः प्रो. मिथिलाप्रसादत्रिपाठी कुलपतिः, महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, विशिष्टातिथिः श्री प्रभातराजतिवारी, निदेशकः महर्षिपतञ्जलिसंस्कृतसंस्थानम्, सभाध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः च समुपस्थिताः आसन्। कार्यशालासमन्वयकः ज्योतिषविभागाध्यक्षः प्रो. हंसधरझाः कार्यशालायाः विषयप्रतिपादनं कृत्वा समागतातिथिभ्यः वाचिकस्वागतं विहितवान्। कार्यक्रमान्ते धन्यवादज्ञापनं डा. श्यामदेवमिश्रेण कृतम्। उद्घाटनसमारोहस्य सञ्चालनं डा. भूपेन्द्रकमारपाण्डेयेन विहितम्।

**नाट्यशास्त्रानुसन्धानसम्बद्धा संगोष्ठी**

२६-२७ फरवरी, २०१८ "नाट्यशास्त्रानुसंधानस्य आयामाः" विषयं स्वीकृत्य आयोजिता राष्ट्रियसंगोष्ठी। उद्घाटनावसरे मुख्यातिथिः राष्ट्रियसंस्कृतसंस्थानस्य पूर्वकुलपतिः प्रो. राधावल्लभत्रिपाठी, अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरश्चास्ताम्। व्याकरणविभागाध्यक्षः प्रो. सुबोध शर्मद्वारा वाचिकस्वागतं, डॉ. धर्मेन्द्रकुमारसिंहदेवेन च प्रास्ताविकं विहितम्। प्रो. राधावल्लभत्रिपाठिना सप्रमाणम् आचार्यभरतमुनेः 'नाट्यशास्त्रस्य' भारतीयसौन्दर्यदर्शनं प्रतिपादितम्। सभाध्यक्षः प्रो. एम्. चन्द्रशेखरः नवीनायामानां शोधविश्लेषणं प्रास्तौत्। कार्यक्रमे धन्यवादज्ञापनं डॉ. संगीता गुन्देचाद्वारा, संचालनं डॉ. नितिनजैनेन च कृतम्।

**अन्तःपरिसरीयनाट्यसमारोहः**

अगरतलास्थपरिसरे राष्ट्रियसंस्कृतसंस्थानेन अन्तःपरिसरीयनाट्यमहोत्सवः आयोजितः। अस्मिने समारोहे भोपालपरिसरीयैः विद्यार्थिभिः प्रो. राधावल्लभत्रिपाठिद्वारा रचितस्य 'प्रेमपीयूषम्' इति नाटकं प्रस्तुतम्। परिसरप्राचार्यस्य प्रो. एम्. चन्द्रशेखरस्य कुशलमार्गदर्शने नेतृत्वे च नाटकस्य निर्देशकः भोपालपरिसरस्य साहित्यविभागाध्यक्षः डा. सनन्दनकुमारत्रिपाठी आसीत्। सहनिर्देशनञ्च डा. देवेन्द्रपाठकस्य चासीत्। नाटके सङ्गीतप्रस्तुतिः डा. शीतांशुत्रिपाठिना, डा. संजयद्विवेदिना श्रीमनोज-पाटीदारेण कृता। भोपालपरिसरस्य दलेन पूर्वरङ्गस्य अपि प्रस्तुतिः कृता।

**संस्कृतप्राविधिककार्यशालायाः आयोजनम्**

परिसरस्य शिक्षाविभागेन फरवरीमासस्य २२-२३दिनाङ्कयोः द्विदिवसीया संस्कृतविकिपीडिया-कार्यशाला आयोजिता। अस्यां कार्यशालायाम् सत्रेषु अहमदाबादात् समागतः श्रीनेहलदवेमहोदयेन संस्कृतविकिपीडिया इत्यस्य सैद्धान्तिकप्रायोगिकपक्षश्चोपस्थापितः, तथैव भोपालस्य श्रीसुयश- श्रीस्वप्निलमहोदयौ हिन्दीविकिपीडियायाः प्रायोगिकाभ्यासं प्रस्तुतवन्तौ।

**युवमहोत्सवे भागग्रहणम्**

दिनाङ्कः ०८.०३.२०१८ तः ११.०३.२०१८ पर्यन्तं परिसरीयविद्यार्थिनः युवमहोत्सवे 'भागं गृहीतवन्तः। अस्यां प्रतियोगितायां विद्यार्थिनां प्रदर्शनं प्रशंसनीयम् अभवत्। प्रतियोगितायां २ स्वर्णपदकानि, ७ रजतपदकानि, ६ कांस्यपदकानि च आहत्य १५ पदकानि प्राप्तानि। अस्य दलस्य समन्वयकाः प्राध्यापकाः डा. धर्मेन्द्रसिंहदेवः, डा. नरेशकुमारपाण्डेयः, डा. विवेकसिंहः, डा. मञ्जूसिंहः च आसन्।

**शिक्षाशास्त्रीया राष्ट्रियसंगोष्ठी**

समावेशात्मकशिक्षायाः प्रासङ्गिकता इति विषयमवलम्ब्य १३-१४ मार्चमासे शिक्षाशास्त्रविभागेन एका संगोष्ठी समायोजिता। शिक्षाशास्त्रि-शिक्षाचार्यपाठ्यक्रमौ स्वीकृत्य एषा संगोष्ठी प्रवर्तिता। अस्य कार्यक्रमस्य उद्घाटनसमारोहे मुख्यातिथिः प्रो. पवनसिंहः, भारतीयप्रबन्धनसंस्थानम्, इंदौर, तथैव अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः चास्ताम्। कार्यक्रमेऽस्मिन् प्रास्ताविकं डा. नगेन्द्रनाथझाः,

स्वागतभाषणं प्रो. प्रभादेवी चौधरी च विहितवन्तौ। सत्रस्यास्य संयोजकः डा. सोमनाथसाहुः आसीत्। १४.०३.२०१८ तमे दिनाङ्के आयोजिते समापनसमारोहे मुख्यातिथिः डा. नयनकिशोरपटेलः, उपायुक्तः, नवोदयविद्यालयसमितिः, भोपालसम्भागः, अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः चास्ताम्। सत्रस्यास्य संयोजकः डा. कृष्णकान्ततिवारी आसीत्। विशिष्टव्याख्यानेषु प्रो. पवनसिंहस्य, डा. सुमितरायमहोदयस्य उद्बोधनं प्रधानम् आसीत्। अस्मिन् कार्यक्रमे समावेशात्मकशिक्षायाः विविधाः विषयाः परिशीलिताः।

**श्रीमती-अनुराधामहोदयायाः सौप्रस्थानिकसमारोहः**

१६.०३.२०१८ दिनाङ्के कार्यालयस्य श्रीमती-अनुराधामहोदयायाः सौप्रस्थानिकसमारोहः आयोजितः। महोदयायाः प्रोन्नतिपूर्वकं स्थानान्तरणं संस्थानस्य वेदव्यास-परिसरं प्रति जातम्। अस्मिन् कार्यक्रमे आध्यक्ष्यं प्रो. एम्. चन्द्रशेखरमहोदयेन आत्मीकृतम्। प्राचार्येण समुपस्थितप्राध्यापकैः कार्यालयाधिकारिभिश्च कृतकार्याणां, बहुविधकार्यकुशलतानाञ्च प्रेरक-प्रसङ्गाः अभिव्यक्ताः, तथैव महोदयायाः भाविजीवनस्य विकासाय प्रायः उत्तमस्वास्थ्यस्य शुभकामनाः प्रार्थिताः।

**वार्षिकोत्सवः**

मार्चमासस्य १६.०३.२०१८ दिनाङ्के परिसरस्य वार्षिकोत्सवस्यायोजनमभवत्। अस्मिन् कार्यक्रमे मुख्यातिथिः मध्यप्रदेशप्रशासनस्य संस्कृतिविभागस्य प्रमुखसचिवः श्रीमनोजश्रीवास्तवः, विशिष्टातिथिः नगरनिगमभोपालस्य अध्यक्षः डॉ. श्रीसुरजीतसिंहचौहानः, सारस्वतातिथिः माखनलालराष्ट्रीयपत्रकारिताविश्वविद्यालयस्य कुलपतिः प्रो. बी. के कुठियाला च समुपस्थिताः आसन्। सभायाः अध्यक्षतां परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः विहितवान्। अतिथीनां वाचिकस्वागतं प्रो. सुबोधशर्मद्वारा कृतम्। परिसरप्राचार्येण प्रो. एम्. चन्द्रशेखरेण भोपालपरिसरस्य शैक्षणिकसत्रे (२०१७-१८)सम्पादिताः विभिन्नाः गतिविधयः वार्षिकप्रतिवेदनं च प्रस्तुताः। मुख्यातिथिः श्रीमनोजश्रीवास्तवः, विशिष्टातिथिः डॉ. श्रीसुरजीतसिंहचौहानः, सारस्वतातिथिः प्रो. कुठियालामहोदयश्च स्ववक्तव्येषु संस्थानस्य प्रगतेः प्रशंसां, उत्तरोत्तरविकासस्य शुभकामनाः अभिव्यक्तवन्तः। सभाध्यक्षेण प्रो. एम्. चन्द्रशेखरेण छात्राणाम् उपलब्धिविषये उद्बोधिताः। कार्यक्रमेऽस्मिन् धन्यवादज्ञापनं डॉ. सनन्दनकुमारत्रिपाठिना विहितम्। शैक्षणिक-सांस्कृतिक-क्रीडादिगतिविधिषु विजेतारः पुरस्कृताः। कार्यक्रमान्ते संघनृत्य-एकलनृत्यप्रस्तुतिः छात्रैः विहिता।

## रघुनाथकीर्तिपरिसरवार्ता

**वसन्तपञ्चमी**

२२.०१.२०१८ तमे दिनाङ्के सोमवासरे श्रीरघुनाथकीर्तिपरिसरे बसन्त-पञ्चमीमहोत्सवः समाचरितः। अस्मिन् महोत्सवे परिसरप्राचार्येण 'प्रो.के.बी.सुब्बरायुडुमहोदयेन सरस्वतीदेव्याः समर्चनं विहितम्। कार्यक्रमेऽस्मिन् वेदविभागस्य प्राध्यापकेन डॉ.शैलेन्द्रप्रसादमहोदयेन पञ्चाङ्गपीठस्य निर्माणं कृत्वा देवविहितविधिना कुशलाचार्यकर्मणा पराम्बायाः विद्यादेव्याः सरस्वत्याः षोडशोपचारेण पूजनं कारितम्। अस्मिन्नवसरे परिसरस्य सर्वे प्राध्यापकाः छात्राश्च सरस्वतीं देवीमार्चन्।

**गणतन्त्रदिवसः**

२६.०१.२०१८ तमे दिनाङ्के परिसरे गणतन्त्रदिवसोपलक्ष्ये प्रो.के.बी.सुब्बरायुडुमहोदयेन ध्वजारोहणं विधाय सभां सम्बोधयता उक्तं यत् अयं गणतन्त्रदिवसः अष्टषष्ठितमो वर्त्तते, सर्वेऽपि संविधानस्य पालनं कुर्युः, स्वाधिकारान् च जानीयुः। अस्माकं पूर्वजानां संविधानस्य निर्माणे महत्योगदानमस्ति। अनन्तरं परिसरच्छात्रैः गणतन्त्रदिवसोपलक्ष्ये देशभक्तिगीतं भाषणं काव्यपाठञ्च कृतम्। तथा परिसरप्राध्यापकैः छात्राणाङ्कृते ज्ञानवर्धकं सन्मार्गप्रेरकं भाषणं प्रदत्तम्।

**मातृभाषादिवसः**

२१.०२.२०१८ तमे दिनाङ्के मातृभाषादिवसः समायोजितः। अस्मिन्नवसरे देवप्रयागस्थस्य ॐकारानन्दमहाविद्यालयस्य हिन्दी-विभागाध्यक्षः डॉ. अनिलकुमार नैथानीमहोदयः विशिष्टाथितिरासीत्। नैथानी-महोदयेन गढ़वालीभाषायां काव्यपाठः भाषणञ्च प्रदत्तम्। अथ साहित्यविभागाध्यक्षेण डॉ. प्रफुल्लगडपालमहोदयेन उक्तं यत्-छात्राणां कृते नैकभाषाणां ज्ञानमावश्यकं भवति तथा मातृभाषायाः प्रयोगं तु सर्वदा कर्त्तव्यम्। मातृभाषादिवसस्यारम्भः बाँग्लादेशे आन्दोलनकारणात् अभवत्। तथान्ते विभिन्नप्राध्यापकैः मातृभाषायाः प्रयोगविषये स्वे-स्वे विचाराः प्रकटिताः।




मातृभाषादिवसकार्यक्रमे अतिथिवर्यं सम्मानयन्तः परिसरीयाः

०४.०३.२०१८ तमे दिनाङ्के परिसरस्य छात्राः युवमहात्सवे भागग्रहणाय मुम्बईनगरीं प्रति के.जी. सोमैय्यापरिसरं गतवन्तः। परिसरस्य

छात्रैस्तत्र बहुत्तमतया प्रदर्शनं कृतम् तथा शास्त्रिद्वितीयवर्षस्य छात्रेण मनीषपन्तेन रजतपदकम् आचार्यप्रथमवर्षस्य छात्रेण नीरजेन कांस्यपदकं प्राप्तमिति परिसरस्य कृते गौरवास्पदं वर्त्तते।



राष्ट्रियसेवायोजनाकार्यक्रमस्य एकं दृश्यम्

### राष्ट्रियसेवायोजना-N.S.S कैंप

२०.०३.२०१८ त: २६.०३.२०१८ दिनाङ्कं यावत् श्रीरघुनाथकीर्तिपरिसरस्य छात्रैः राष्ट्रीयसेवायोजनायाम् (N.S.S) भागग्रहणं कृतम्। अस्य आयोजनं देवप्रयागस्य निकटे 'सौंड़' इति ग्रामेऽभवत्। अस्य संयोजनं डॉ. सुरेशशर्मणा विहितम्। अस्यां राष्ट्रियसेवायोजनायां पञ्चविंशतिछात्रैः भागो गृहीतः। एतैः छात्रैः तत्रत्यपर्यावरणमुद्वीक्ष्य कर्त्तव्योचितानि कार्याणि विहितानि यथा प्रथमे दिवसे नागरिकजनानां याः काः अपि समस्या आसन् ताः परिगणय्य विचारो विहितः। द्वितीये दिवसे स्वयंसेविभिः जलस्रोतसः स्वच्छीकरणं विहितम्, एवमेव तृतीयेऽहनि स्वयंसेविभिः सम्मिल्य तृणानि समुत्थाप्य वह्नौ प्रज्वालितानि। चतुर्थे दिवसे 'व्यक्तित्वविकासविषये' डॉ. शैलेन्द्रोनियालवर्येण छात्राः प्रत्यायिताः, तथा पञ्चमे दिवसे प्रज्वलितं वह्निं जलेन प्रशमनाय छात्रैः प्रयासः कृतः। षष्ठे दिवसे ग्रामीणगृहाणि प्रगत्य तत्रापि स्वच्छता कृता, सप्तमे दिवसे "रघुनाथकीर्तिपरिसरस्य" प्रो. बनमालीविश्वालः, डॉ.वीरेन्द्रबर्त्वालः, डॉ. शैलेन्द्रउनियालः, श्री श्रीओमशर्मा इत्यादिप्राध्यापकैः तत्र स्वीयभाषणानि प्रदत्तनि। अस्मिन्नवसरे श्रीमती राखीदेवी तत्र सभां सम्बोधितवती।

### परिसरे समायोजिताः विविधशास्त्रीयाः राष्ट्रियान्ताराष्ट्रियसङ्गोष्ठ्यः


राष्ट्रियसङ्गोष्ठ्यां विराजमानाः अतिथयः प्राचार्यश्च

राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकार्तिपरिसरे फरवरीमासे वेद-व्याकरण-साहित्य-ज्योतिष-आधुनिक-वेदान्तशास्त्रीयाः राष्ट्रियान्ताराष्ट्रियसङ्गोष्ठ्यःसमायोजिताः। फरवरीमासस्य प्रथमदिनाङ्कतः द्वितीयदिनाङ्कं यावद् वेदस्मृत्योः धर्मादिविचारः इति विषयमधिकृत्य वेदविभागीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना।

फरवरीमासस्यैव २-४ दिनाङ्कं यावत् बौद्धवैयाकरणानां संस्कृतव्याकरणपरम्परायां योगदानम् इति विषये अन्ताराष्ट्रिया व्याकरणशास्त्रीया सङ्गोष्ठी समायोजिता। फरवरीमासस्यैव चतुर्थदिनाङ्कात् षष्ठदिनाङ्कं यावत् बौद्ध-मिश्रितसंस्कृतसाहित्यस्य वैश्विकः सन्देशः इति विषयमधिकृत्य दिनद्वयव्यापिन्यन्ताराष्ट्रिया सङ्गोष्ठी सम्पन्ना। ४-५ दिनाङ्कयोः ज्योतिष-दर्शनयोः अन्तःसम्बन्धः इति विषयमधिकृत्य ज्योतिषविभागीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना। ८-९ दिनाङ्कयोः भारतीय समाज का प्रतिबिम्बनऐतिहासिक और साहित्यिक सन्दर्भ में इति विषये आधुनिकविभागीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना। ९-१० दिनाङ्कयोः अद्वैततत्त्वज्ञानस्याधुनिकयुगे महत्त्वम् इति विषये वेदान्तविभागीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना।

२७-२८ दिनाङ्कयोः न्यायशास्त्रे पदवृत्तिविचारः इति विषये न्यायशास्त्रीया राष्ट्रिया सङ्गोष्ठी सम्पन्ना।

### परिसरे समायोजितानि विविधशास्त्रीयविशिष्टव्याख्यानानि

राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकार्तिपरिसरे फरवरीमासे वेद-व्याकरण-साहित्य-ज्योतिष-आधुनिक-वेदान्तशास्त्रीय-विशिष्टव्याख्यानानि समायोजितानि। फरवरीमासस्य प्रथमदिनाङ्के वैदिकस्वराः तेषां प्रयोजनानि च इति विषयमधिकृत्य वेदविभागीयं विशिष्टव्याख्यानं सम्पन्नम्।

फरवरीमासस्यैव द्वितीयदिनाङ्के शब्दविद्यायां बौद्धाचार्याणां योगदानम् इति विषये व्याकरणशास्त्रीयं विशिष्टं व्याख्यानं समायोजितम्।

फरवरीमासस्यैव चतुर्थदिनाङ्के बौद्ध-मिश्रितसंस्कृतसाहित्ये अनुवाद-अनुसन्धानयोः सम्भावना: इति विषयमधिकृत्य साहित्यशास्त्रीयं विशिष्टं व्याख्यानं सम्पन्नम्।

षष्ठदिनाङ्के ज्योतिष-दर्शनयोः सम्मतः ब्रह्मस्वरूपविचारः इति विषयमधिकृत्य ज्योतिषशास्त्रीयं विशिष्टं व्याख्यानं सम्पन्नम्।

सप्तमदिनाङ्के हिन्दीसाहित्य में अन्तर्निहित ऐतिहासिक एवं सांस्कृतिक तत्त्व इति विषये आधुनिकविभागीयं विशिष्टव्याख्यानं सम्पन्नम्।

नवमदिनाङ्के वेदान्तदृष्ट्या वस्त्ववस्तुरूपविमर्शः इति विषये वेदान्तविभागीयं विशिष्टं व्याख्यानं सम्पन्नम्।

सप्तविंशे दिनाङ्के न्यायशास्त्रे पदवृत्तिविचारः इति विषये न्यायशास्त्रीयं विशिष्टं व्याख्यानं सम्पन्नम्।

# क. जे. सोमैयासंस्कृतविद्यापीठवार्ता

**सतर्कताजागरूकतासप्ताहः**

मुख्यालयस्यादेशानुसारं परिसरेऽस्मिन् सतर्कताजागरूकतासप्ताहकार्यक्रमः 30-10-2017 दिनाङ्कतः 04-11-2017 पर्यन्तं छात्राणां कृते विविधस्पर्धायोजनेन, शपथग्रहणेन, सामूहिकचर्चया च युक्तः समायोजितः। कार्यक्रमस्यास्य संयोजकस्य प्रो. प्रकाशचन्द्रवर्यस्य मार्गदर्शने डा. शङ्कर आन्धलेवर्यः सम्पूर्णव्यवस्थामकार्षीत्। प्राचार्याः प्रो. सुदेशकुमारशर्माणः, परिसरीयाः सर्वे कर्मचारिणः छात्राश्च भागमगृह्णन्। 'भ्रष्टाचारमुक्तभारतम्' इति विषये सामूहिकचर्चाकार्यक्रमः अध्यापकानां छात्राणां च सन्दर्भेऽस्मिन् समायोजितः।

सामूहिकशपथग्रहणसन्दर्भस्य चित्रम्



संस्कृतप्रविधिकार्यशालाकार्यक्रमस्य एकं दृश्यम्

**त्रिदिवसीयसंस्कृतप्रविधिककार्यशाला सङ्गोष्ठी च**

परिसरेऽस्मिन् 09-11-2017 तः 11-11-2017 दिनाङ्कपर्यन्तं शिक्षाशास्त्रविभागे संस्कृतप्राविधिकप्रशिक्षणकार्यशाला समायोजिता। कार्यशालायामस्यां शृङ्गेरीतः, गुरुवयूरुतः, तिरुपतितः, पुरीतः, अस्मत्परिसरतः, मुम्बईनगराच्चानेके अध्यापकाः, प्राध्यापकाः, शोधच्छात्राश्च आहत्य 116 प्रतिभागिनः भागमगृह्णन्। कार्यशालाया उद्घाटनं प्रो. प्रकाशचन्द्रमहोदयानामाध्यक्ष्ये, डा. वसुन्धरा पद्मनाभन्महाभागाया मुख्यातिथ्ये, प्रो. मदनमोहनझावर्याणां संयोजकत्वे समजनि। कार्यशालायामस्यां प्रो. मदनमोहनझा, डा. देवदत्तसरोदे, डा. वि.एस्.वि. भास्कररेड्डी, डा. नीलाभतिवारी, डा. गणेशपण्डितः, डा. कुमारश्च प्राविधिकप्रशिक्षणं दत्तवन्तः। कार्यशालायाः समापनसत्रं परिसरप्राचार्याणां प्रो. सुदेशकुमारशर्मणामाध्यक्ष्ये, श्रीचिन्मयविश्वविद्यापीठस्य कुलपतीनां प्रो. बी. माधवन्महोदयानां मुख्यातिथ्ये, कर्नाटकसंस्कृतविश्वविद्यालयस्य कुलपतिचराणां प्रो. श्रीनिवासवरखेडीमहाशयानां सारस्वतातिथ्ये, संयोजकानां प्रो. मदनमोहनझावर्याणामुपस्थितौ च सुसञ्जातम्। कार्यशालायामस्यां प्रतिभागिनः आभासीयसंस्कृतशास्त्राणामध्ययनेऽध्यापने च सङ्गणकस्य महत्त्वमुपयोगञ्च ज्ञात्वा तुष्टाः प्रेरिताश्चाभूवन्। बहवोऽत्रैतादृशकार्यशालासंयोजनं संस्कृतक्षेत्रे मुहुर्मुहुः भवत्विति स्वाभिप्रायं प्राचीकटन्।

**महाराष्ट्रराज्यस्तरीयशास्त्रीयस्पर्धाः**

प्रतिवर्षमिवास्मिन् वर्षेऽपि संस्थानस्य अखिलभारतीयशास्त्रीयस्पर्धानिमित्तं छात्राणां चयनार्थं महाराष्ट्रराज्यस्तरे विभिन्नाः शास्त्रीयस्पर्धाः नवम्बरमासस्य 17 तमे दिनाङ्के समायोजिताः। विशेषतः अस्मिन् वर्षे गोवाराज्यस्तरीयस्पर्धाः पृथक् तस्मिन्नेव राज्ये समायोजिताः। अतः केवलं महाराष्ट्रस्य विभिन्नकोणेभ्यः छात्राः समागताः। कार्यक्रमोऽयं प्रो. बोधकुमारझावर्याणां संयोजने प्राचार्याणां निर्देशने, जयपुरपरिसरस्य प्रो. श्रीकृष्णशर्मणां, जम्मूपरिसरस्य प्रो. चन्द्रमौलिरैणानां, मुम्बईनगरस्य प्रो. रामरूपमिश्राणां, जयपुरपरिसरस्य श्रीमती प्रो. भगवतीसुदेशवर्याणां, मुम्बईनगरस्य प्रो. एन्. एन्. जोशी इत्यादीनां न्यायनिर्णायकत्वे सुष्ठु समाचरितः। डा. कुमारः डा. स्वर्गकुमारः इत्येतौ कार्यक्रमसञ्चालमकुरुताम्।

**नाटकविजयोत्सवसम्भ्रमाचरणम्**

अस्मत्परिसरीयाः छात्राः अस्मिन् वर्षे संस्थानस्य अगरतलापरिसरे समायोजितायाम् अखिलभारतीयनाट्यस्पर्धायां तृतीयपुरस्कारेण सभाजिताः अभूवन्। अतः परिसरेऽस्मिन् संयोजकानां प्रो. ई.एम्. राजन्-वर्याणां निर्देशने सर्वेषां छात्राणां सहकृतवतां कर्मचारिणां च सम्माननकार्यक्रमः नवम्बरमासस्य 30 तमे दिनाङ्के प्राचार्याणां प्रो. सुदेशकुमारशर्ममहोदयानामाध्यक्ष्ये विजयोत्सवकार्यक्रमः समायोजितः।

**व्याकरणविभागीयसङ्गोष्ठी विशिष्टव्याख्यानञ्च**

परिसरेऽस्मिन् डिसम्बरमासस्य 20 तमदिनाङ्कतः 22 तमदिनाङ्कपर्यन्तं व्याकरणविभागे राष्ट्रियसङ्गोष्ठी विशिष्टव्याख्यानञ्च समायोजि। प्रथमे दिने आचार्याणां शशिनाथझावर्याणां मुख्यातिथ्ये, पण्डितानां रामरूपमिश्राणां सारस्वतातिथ्ये परिसरप्राचार्याणाम् आचार्याणां सुदेशकुमारशर्मणामाध्यक्ष्ये, संयोजकानाम् आचार्याणां प्रकाशचन्द्रवर्याणामुपस्थितौ प्रातः 11:00 वादने उद्घाटनं समजनि। अपराह्णतः देशस्य विभिन्नप्रदेशेभ्यः आगतानां विदुषां विविधसत्राणि सञ्चालितानि द्वितीयदिनस्य सायं यावत्। तृतीये दिने गुजरातस्थस्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतीनामाचार्याणाम् अर्कनाथचौधरिवर्याणां विशिष्टव्याख्यानेन सह सेवानिवृत्तिं गच्छतामाचार्याणां प्रकाशचन्द्रमहोदयानां सौप्रस्थानिककार्यक्रमः समायोजितः। कार्यक्रमेऽस्मिन् अनेके विशिष्टातिथयः प्रो. वाय्. एस्. रमेशमहोदयप्रभृतयः समुपस्थिताः आसन्। आध्यक्ष्यं तावत्परिसरप्राचार्याणां प्रो. सुदेशकुमारशर्ममहोदयानामासीत्। प्रो. बोधकुमारझावर्याः सर्वेभ्यः धन्यवादान् व्यतरन्।

प रि स र वा र्ता

**आचार्याणां प्रकाशचन्द्रमहोदयानां सौप्रस्थानिककार्यक्रमः**

मुम्बईपरिसरस्यास्य व्याकरणविभागे वरिष्ठाः आचार्याः विभागाध्यक्षपदमलङ्कुर्वाणाः प्रो. प्रकाशचन्द्रमहोदयाः परिसरस्य आरम्भत एवात्र कार्यनिरताः परिसरस्तम्भायमानाः छात्रवत्सलाः मधुरभाषिणः सर्वप्रियाः डिसम्बरमासस्य 31 तमे दिनाङ्के सेवातः निवृत्ता भवन्तीति ससम्मानं सौप्रस्थानिककार्यक्रमः 23-12-2017 तमे दिनाङ्के समायोजितः। तत्रानेके ज्येष्ठाः विशिष्टाः अतिथयश्च समुपस्थिता आसन्। तेषु गुजरातस्थश्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. अर्कनाथचौधरिमहोदयाः, जयपुरपरिसरीयाः प्रो. वाय्. एस्. रमेशमहाशयाः, परिसरप्राचार्याः प्रो. सुदेशकुमारशर्माणः, परिसरीयाः सर्वे विभागाध्यक्षाः, आचार्याः, प्राध्यापकाः कार्यालयकर्मचारिणः विशेषरूपेण श्रीमती प्रकाशचन्द्रमहाभागाश्च सभाशोभां वर्धितवन्तः। बहवः आचार्यमुद्दिश्य स्वाभिप्रायं प्राकटयन्। ससन्तोषं सगौरवं ससम्मानं साभिवन्दनपुरस्सरं सर्वे आचार्याणां सौप्रस्थानिककार्यक्रमेऽस्मिन् भागमगृह्णन्।


सरस्वतीपूजां विदधानः प्राचार्यवर्यः

**वसन्तपञ्चमीसरस्वतीपूजनञ्च**

प्रतिवर्षमिवास्मिन् वर्षे जनवरीमासस्य 22तमे दिनाङ्के विद्याप्रदायिन्याः सरस्वत्याः पूजनं वसन्तपञ्चमीसन्दर्भे सर्वेषां परिसरीयसदस्यानामुपस्थितौ प्राचार्याणामाध्यक्ष्ये कृतम्।

**राष्ट्रियमतदातृदिवसः**

मुख्यालयस्य निर्देशानुसारं जनवरीमासस्य 25तमे दिनाङ्के मतदातृदिवसाचरणमकारि। तत्र परिसरीयाः सर्वेऽपि सदस्याः प्राचार्यमुख्याः मतदानस्य शपथग्रहणमकुर्वन्।

**गणतन्त्रदिवसाचरणम्**

महाराष्ट्रराज्यस्य मुम्बई नगरस्य विद्याविहारे सोमैयाशिक्षणसंस्थायाः सर्वे महाविद्यालयाः अस्माकं परिसरश्चसामूहिकरूपेण जनवरी मासस्य 26तमे दिनाङ्के भारतगणतन्त्रदिवसस्याचरणमकुर्वन्। तत्र प्राचार्याः आचार्याः सुदेशकुमारशर्मावर्याः परिसरीयाः आचार्याः प्राध्यापकाः छात्राश्च भागमगृह्णन्।

**छात्रोद्बोधनकार्यक्रमः**

वत्सरेऽस्मिन् शिक्षाशास्त्रिविभागे द्वितीयवर्षीयच्छात्राणां मनोवैज्ञानिक-शैक्षणिकप्रायोगिकपरीक्षाः मौखिकपरीक्षाश्च जनवरीमासस्य 29दिनाङ्कतः फरवरीमासस्य 2 दिनाङ्कपर्यन्तं प्राचलन्। तत्र बाह्यपरीक्षकरूपेण प्रो. गङ्गाधरपण्डा, कुलपतिचरः, श्रीजगन्नाथसंस्कृतविश्व-विद्यालयः, पुरी, निरीक्षकरूपेण डा. श्रीगोविन्दपाण्डेयः, वरिष्ठप्राध्यापकः, शिक्षाशास्त्रम्, भोपालपरिसरः, आन्तरिकपरीक्षकरूपेण परिसरीय-शिक्षाशास्त्रविभागाध्यक्षः प्रो. मदनमोहनझाः, संयोजकः डा. वी. एस्. वी. भास्कररेड्डिमहोदयश्चासीत्। कार्यक्रमस्यास्याङ्गत्वेन शिक्षाविदामेतेषां छात्रोद्बोधनकार्यक्रमस्य 01-02-2018 दिनाङ्के अपराह्ने 3:00 वादने समायोजनमकारि। कार्यक्रमस्यास्य शिक्षाशास्त्रप्राध्यापकः डा. कुमारः सञ्चालनमकरोत्।

**शिक्षाशास्त्रविभागीयराष्ट्रियसङ्गोष्ठी विशिष्टव्याख्यानञ्च**

परिसरस्यास्य शिक्षाशास्त्रविभागे, फरवरीमासस्य 8-9 दिनाङ्कयोः द्विदिवसीयराष्ट्रियसङ्गोष्ठी भाषाशिक्षणे नवाचाराः इति शीर्षकेण समायोजिता। 08-02-2018तमे दिनाङ्के पूर्वाह्ने 10:00 वादने समायोजितस्य कार्यक्रमस्यास्योद्घाटनसमारम्भे मुख्यातिथिः डा. एस्. एस्. डाकुआ, प्राचार्यः, के. वि. एस्., सायन, कोलीवाडा, सारस्वतातिथिः श्रीमती प्रमीला पाल, प्राचार्या, के. वि. एस्., भाण्डुप, अध्यक्षः प्रो. सुदेशकुमारशर्मा, प्राचार्यः, क. जे. सोमैयासंस्कृतविद्यापीठम्, शिक्षाशास्त्रविभागाध्यक्षः, प्रो. मदनमोहनझाः, संयोजकः डा. वि. एस्. वि. भास्कररेड्डिचोपस्थिताः आसन्। कार्यक्रमसञ्चालनं डा. कुमारः अकरोत्। तदनु पूर्वाह्ने 11:45 वादनतः दिनद्वयं यावत्स्थलद्वये सङ्गोष्ठीसत्राणि क्रमशः विभिन्नेभ्यः प्रदेशेभ्यः समागतानां विदुषां परिसरीयच्छात्राणाञ्चपत्रप्रस्तुतिपुरस्सरं समायोजितानि।

09-02-2018 दिनाङ्के अपराह्ने 2:00 वादने समारोपसमारम्भः विशिष्टव्याख्यानञ्च समायोजितम्, यस्मिन् स्वागतभाषणं प्रो. मदनमोहनझाः, विभागाध्यक्षः, शिक्षाशास्त्रम्, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बईपरिसरः, सङ्गोष्ठीप्रतिवेदनं संयोजकः डा. वि. एस्. वि. भास्कररेड्डिः, वरिष्ठप्राध्यापकः, शिक्षाशास्त्रम्, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बईपरिसरः, विशिष्टव्याख्यानं मुख्यातिथिभाषणञ्च प्रो. रमेशप्रसादपाठकः, शिक्षासङ्कायप्रमुखः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली, आध्यक्ष्यं प्रो. सुदेशकुमारशर्मा, प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बई-परिसरः, धन्यवादसमर्पणं डा. देवदत्तसरोदे, वरिष्ठप्राध्यापकः, शिक्षाशास्त्रम्, मुम्बईपरिसरः, कार्यक्रमसञ्चालनं डा. विनोदकुमारशर्मा, शिक्षाशास्त्रप्राध्यापकश्च अकार्षीत्।

**मातृभाषादिवसः**

भारतसर्वकारेण मातृभाषादिवसः इति कार्यक्रमस्यायोजनाय निर्देशो दत्तः। तदनु परिसरेऽस्मिन् फरवरीमासस्य 22तमे दिनाङ्के तत्कार्यक्रमस्यायोजनं सुश्रीवैशालीनिवडुंगे, सङ्गणकाध्यापिकायाः संयोजकत्वे, प्राचार्याणामाचार्याणां सुदेशकुमारशर्मवर्याणाम् आध्यक्षे, शिक्षाशास्त्रे वरिष्ठप्राध्यापकानां डा. देवदत्तसरोदेमहोदयानां विशिष्टव्याख्यानेन, परिसरीयसदस्यानां सर्वेषां स्वमातृभाषया स्वाभिप्रायकथन पुरस्सरमकारि।

**साहित्यविभागीयराष्ट्रियशोधसङ्गोष्ठी विशिष्टव्याख्यानमाला च**

परिसरस्यास्य सहित्यविभागे मार्चमासस्य 16-17 दिनाङ्कयोः परिसरप्राचार्याणां प्रो. सुदेशकुमारशर्ममहोदयानामाध्यक्ष्ये, तिरुपतिस्थरष्ट्रियसंस्कृतविद्यापीठस्य शैक्षणिक समन्वयकानां साहित्याचार्याणां जी. एस्. आर्. कृष्णमूर्तिमहोदयानां विशिष्टातिथ्ये, सोमैयामहाविद्यालयस्य निवृत्तसंस्कृतप्राध्यापकानां डा. एन्. एन्. जोशिवर्याणां सारस्वतातिथ्ये, परिसरीयसाहित्यविभागीयाध्यक्षाणां प्रो. ई. एम्. राजन्महोदयानां संयोजकत्वे, डा. ई. आर्. नारायणन्महाशयानां सहित्यविभागीयवरिष्ठप्राध्यापकानाञ्च संयोजकत्वे काव्यालङ्कारविमर्शः इति द्विदिवसीयराष्ट्रियशोधसङ्गोष्ठी विशिष्टव्याख्यानमालाकार्यक्रमश्च समजनि। देशस्य नानाप्रदेशेभ्यः आगताः साहित्यविद्वांसः स्वकीयपत्राणि विभिन्नसत्रेषु प्रास्तुवन्।



अतिथिवर्याणां स्वागतं विदधानः परिसरप्राचार्यः

**आधुनिकविभागीयराष्ट्रियसंगोष्ठी**

राष्ट्रियसंस्कृतसंस्थानस्य मुम्बईस्थे क. जे.सोमैयापरिसरे मार्चमासस्य 19तमे दिनाङ्के आधुनिकविषयविभागीयाद्विदिवसीया राष्ट्रियसङ्गोष्ठी परिसरप्राचार्याणां प्रो. सुदेशकुमारशर्मवर्याणामाध्यक्ष्ये, संस्थानस्य जयपुरपरिसरस्य शारीरकशिक्षाविभागे भूतपूर्वाचार्याणाम् ओमप्रकाशभढानामहोदयानां मुख्यातिथ्ये, महाराष्ट्रराज्यस्य हिंगोलीस्थस्यबाधमारेकाला एवं वाणिज्यमहाविद्यालयस्य क्रीडानिदेशकानां डा. विश्वनाथ एस. गोमचालेमहोदयानां सारस्वतातिथ्ये, हिन्दीविभागीयप्राध्यापिकायाः डा. गीतादूबेमहाभागायाः संयोजकत्वे वैश्वीकरण के परिप्रेक्ष्य में आधुनिक शिक्षा इति शीर्षकयुक्ता समुदघाटि। हिन्दी - आङ्ग्ल- राजनीतिशास्त्र - मराठी - शारीरकशिक्षा - सङ्गणकविषयाणां विभिन्नसत्राणि दिनद्वये सञ्चालितानि। 20-03-2018 दिनाङ्के अपराह्ने समारोपसमारम्भः, परिसरप्राचार्याणां प्रो. सुदेशकुमारशर्ममहोदयाना- माध्यक्ष्ये, परिसरीय-भूतपूर्वव्याकरणविभागाध्यक्षाणां प्रो. प्रकाशचन्द्रवर्याणां मुख्यातिथ्ये, संस्थानस्य अगरतलास्थ - एकलव्यपरिसरे राजनीति-शास्त्राध्यापकस्य डा. रञ्जयकुमारसिंहमहाशयस्य विशिष्टातिथ्ये डा. गीतादूबेमहाभागायाः संयोजकत्वे परिसरीयसदस्यानां सर्वेषामुपस्थितौ समजनि।

**त्रिदिवसीया राष्ट्रियासङ्गोष्ठीकार्यशाला च**

परिसरस्यास्य शिक्षाविभागीयवरिष्ठप्राध्यापकस्य डा. देवदत्तसरोदेमहोदयस्य समन्वयकत्वे प्रचाल्यमानायाः संस्कृतविज्ञान-परियोजनायाः अङ्गत्वेन निरामयानन्दजीवनम्- योगायुर्वेदविज्ञानम् इति शीर्षकाङ्कितां त्रिदिवसीया राष्ट्रियसङ्गोष्ठी कार्यशाला च (National Seminar & Workshop) २२/०३/२०१८ दिनाङ्कतः २४/०३/२०१८ पर्यन्तं देशस्य विविधेभ्यः प्रदेशेभ्यः समागतानां वैज्ञानानिकानां विदुषाञ्चोपस्थितौ समायोजिता। तत्र प्रथमदिने विशिष्टातिथिरूपेण कुञ्चिकाभाषणं विधातुं प्रो. कुलदीपकोहली महोदयः, निदेशकः, आयुषविभागः, महाराष्ट्रराज्यम्, सारस्वतातिथिरूपेण प्रो. लक्ष्मीकान्तद्विवेदीमहाभागः, रसशास्त्रविभागाध्यक्षः, राष्ट्रिय - आयुर्वेदमहाविद्यालयः, जयपुरम्, राजस्थानम्, अध्यक्षरूपेण प्रो. सुदेशकुमारशर्ममहोदयः, प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बईपरिसरः उपस्थायः संस्कृते विज्ञानस्य स्रोतांसि प्रतिपादयन्तः विश्वस्य कृते योगायुर्वेदस्य महत्तरयोगदानं प्रत्यपादयन्।

२३-०३-२०१८ दिनाङ्के विभिन्नसत्रेषु आमन्त्रितानां विदुषां पूर्वनिर्धारितेषु आयुर्वेद-रसशास्त्र- योगविज्ञानादिषु बहुषु विषयेषु पत्रप्रस्तुतिरभवत्। २४-०३-२०१८ दिनाङ्के प्रातः आधुनिकायुर्विज्ञानेन सार्धं योगायुर्वेदयोः समन्वयः इति विषये परिचर्चापि (Panel Discussion) कृता।

२४-०३-२०१८ दिनाङ्केअपराह्ने 3:30 वादने समारोपसमारम्भे मुख्यातिथिरूपेण प्रो. पी. के. प्रजापतिमहोदयः, सारस्वतातिथिरूपेण डा. इन्दिराप्रियदर्शिनीमहाभागा, अध्यक्षरूपेण प्रो. सुदेशकुमारशर्ममहोदयः, प्राचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, मुम्बईपरिसरः उपस्थाय भागग्राहिभ्यः प्रमाणपत्राणि वितीर्य कार्यशालायाः सफलतां समस्तुवन्। सम्पूर्णस्यास्य कार्यक्रमस्य संयोजकः डा. देवदत्तसरोदे, सहसंयोजकः डा. एम्. सुदर्शनचिपळूणकरश्चासीत्। तत्रपरिसरीयाः अपि केचन प्राध्यापकाः भागग्रहणं कृत्वा पत्रं प्रास्तुवन्।

**स्थानान्तरणवार्ताः -**

बहुभ्यः वर्षेभ्यः वरिष्ठलिपिक (यू. डी. सी.) रूपेण सुष्ठुकर्मनिरतकार्यालयकर्मचारिणः श्रीमतः सी.आर्. जोशिमहोदयस्य हिमाचलस्य, गरलीप्रदेशस्य वेदव्यासपरिसरं प्रति असिस्टेंट अनुभागाधिकारिरूपेण स्थानान्तरणं जातमिति तस्य महोदयस्य सौप्रस्थानिककार्यक्रमः परिसरसदस्यानां सर्वेषामुपस्थितौ 08-02-2018तमे दिनाङ्के समायोजितः।

राष्ट्रियसंस्कृतसंस्थानस्य शृङ्गेरीस्थे राजीवगान्धिपरिसरे बहुभ्यः वर्षेभ्यः वरिष्ठलिपिक (यू. डी. सी.) रूपेण कार्यनिरतस्य श्रीमतः गुरुराजभट्टस्य स्थानान्तरणं 19-03-2018 तमे दिनाङ्के असिस्टेंट अनुभागाधिकारिरूपेण अस्मत्परिसरं प्रत्यागमनं सञ्जातम्।

## राजीवगान्धीपरिसरवार्ता

**व्याकरणशास्त्रे विशिष्टव्याख्यानमाला**

परिसरेऽस्मिन् शारदाविशिष्टव्याख्यानमाला २३ अक्टोबर २०१७ दिनाङ्के संवृत्ता। तत्र व्याकरणशास्त्रे व्याख्यानं कर्तुं विद्वांसः श्रीमन्तः डा. विष्णुनम्पूतिरिवर्याः समागताः। ते च सरलया छात्रेभ्यः स्वीयवाक्यार्थविषयम् उद्बोधितवन्तः। परिसरप्राचार्याः आचार्याः प्रो. महाबलेश्वरभट्टवर्याः अध्यक्षपदान्विताः अभूवन्। डा. सि,एस्.एस्.नरसिंहमूर्तिवर्याः व्याख्यातॄणां परिचयं, तेभ्यः धन्यवादञ्च समार्पयन्।

**कन्नडराज्योत्सवः**

परिसरेऽस्मिन् १ नवन्बर् २०१७ दिनाङ्के कन्नडराज्योत्सवः समाचरितः। तत्र डा.आरतीवर्याः, श्रीमन्तः वेङ्कटरमणवर्याश्च अभ्यागतपदम् अलङ्कुर्वाणाः आसन्। परिसरप्राचार्याः आचार्याः डा. महाबलेश्वरभट्टवर्याः आध्यक्ष्यम् अवहन्। इमे च कन्नडप्रबन्धलेखनादिस्पर्धासु भागग्राहिभ्यः छात्रेभ्यः पुरस्कारं दत्तवन्तः। तदैव कन्नडसांस्कृतिककार्यक्रमोऽपि सम्वृत्तः। तत्र परिसरच्छात्राः नाट्यादिषु भागं समगृह्णन्।

**एकतादिवसः जागरूकतासप्ताहश्च**

परिसरेऽस्मिन् ०७ नवम्बर २०१७ दिनाङ्के एकतादिवसः जागरूकतासप्ताहश्च समाचरितः। इमं कार्यक्रमं भारतीयसर्वकारानुमतप्रतिज्ञास्वरूपोद्घोषणेन सर्वे च प्राचार्यप्रमुखाः अध्यापकाः छात्राश्च अन्वतिष्ठन्। तत्र अभ्यागताः डा. प्रमोदवर्याः, लक्ष्मीवर्याः, गोपालहण्डावर्याः, वेणुगोपालवर्याः, सतीशवर्याश्च आसन्। एतत्कार्यक्रमे सुब्रायभट्टवर्याः प्रतिज्ञोद्घोषणं कृतवन्तः। श्रीमन्तः कृष्णानन्तपद्मनाभवर्याः कार्यक्रमस्य सञ्चालकाः आसन्।

**साहित्यशास्त्रे विशिष्टव्याख्यानमाला**

परिसरेऽस्मिन् शारदाविशिष्टव्याख्यानमाला २० नवम्बर २०१७ दिनाङ्के साहित्यशास्त्रे संवृत्ता। तत्र व्याख्यानं कर्तुं विशिष्टाः विद्वांसः श्रीमन्तः रामकुमारवर्याः समागताः। ते च छात्रेभ्यः स्वीयवाक्यार्थविषयं सुषमम् उद्बोधितवन्तः। परिसरप्राचार्याः आचार्याः प्रो. महाबलेश्वरभट्टवर्याः आध्यक्ष्यं निरवहन्।

**गीताजयन्तीमहोत्सवः**

परिसरेऽस्मिन् ३० नवम्बर २०१७ दिनाङ्के गीताजयन्तीमहोत्सवः समाचरितः। तत्र परिसरीयाः प्राचार्यप्रमुखाः अध्यापकाः सर्वे च छात्राः भगवद्विष्णोः आराधनपूर्वकं श्रीमद्भगवद्गीतापारायणं कृतवन्तः। एतत्कार्यक्रमस्य सञ्चालकाः वाग्वर्धिनीसमित्यध्यक्षाः डा. नवीनहोळ्ळवर्याः आसन्।

**ज्योतिषशास्त्रे विशिष्टव्याख्यानमाला**

परिसरेऽस्मिन् २० दिसम्बर् २०१७ दिनाङ्के ज्योतिषशास्त्रे विशिष्टव्याख्यानमाला संवृत्ता। तत्र विद्वांसः गोपालकृष्णहेगडेवर्याः छात्रेभ्यः सुबोधतया ज्योतिषशास्त्रे व्याख्यानं कृतवन्तः। ज्योतिषशास्त्रविभागीयाः प्राध्यापकाः डा. मुरलीकृष्णवर्याः व्याख्यातॄणां परिचयं तेभ्यश्च धन्यवादं समार्पयन्। आचार्याः महाबलेश्वरभट्टवर्याः अध्यक्षपदारूढाः आसन्। एतत्विशिष्टव्याख्यान-मालाकार्यक्रमस्य सञ्चालकाः विद्वांसः श्रीमन्तः श्यामसुन्दरवर्याः आसन्।

**केन्द्रीयविद्यालयसंस्कृतशिक्षकाणां सेवावृत्तिप्रशिक्षणम्**

परिसरेऽस्मिन् २३ दिसम्बर २०१७ दिनाङ्के केन्द्रीयविद्यालयसंस्कृतशिक्षकाणां सेवावृत्तिप्रशिक्षणम् इति कार्यक्रमः समारब्धः। दीपप्रज्वालनेन कार्यक्रमस्यास्योद्घाटकाः श्रीमन्तः च.मू.कृष्णशास्त्रिवर्याः, श्रीमन्तः चन्द्रशेखरवर्याः, एवं श्रीमन्तः वेङ्कटरमणभट्टवर्याश्च आसन्। परिसरीयमीमांसाविभागाध्यक्षाः विद्वांसः सुब्रायभट्टवर्याः अध्यक्षपदान्विताः आसन्। कार्यक्रमस्यास्य संचालकाः शिक्षाशास्त्रिविभागाध्यापकाः डा. आर्. बालाजीवर्याः आसन्।


प्रशिक्षणवर्गस्य उद्घाटनं विदधानः श्रीचमूकृष्णशास्त्रिवर्यः

## गुरुवायूरपरिसरवार्ता

**गणतन्त्रदिवसाचरणम्** – २६-०१-२०१८ तमे दिने गणतन्त्रदिनोत्सवः सञ्चालितः। प्राचार्यैः आचार्यैः च.ल.ना. शर्ममहाभागैः राष्ट्रध्वजस्योत्तोलनपूर्वकं गणतन्त्रदिनस्य प्राधान्यमधिकृत्य भाषणं कृतम्।

**संस्कृतच्छात्रप्रातिभसमारोहे भागग्रहणम्** – तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन २९-०१-२०१८तः ०२-०२-२०१८ पर्यन्तं समायोजिते अखिलभारतीय-संस्कृतच्छात्रप्रातिभसमारोहे परिसरीयच्छात्राः आचार्यद्वितीयवर्षस्य प्रतीष. एन्.आर्. नृत्यस्पर्धायां प्रथमपुरस्कारं, एकपात्राभिनये द्वितीयपुरस्कारं, आचार्यप्रथमवर्षस्य वीणाचन्द्र-वेदान्तभाषणे द्वितीयपुरस्कारं, शास्त्रितृतायवर्षस्य दीप् ज्योति देव् न्यायभाषणे तृतीयपुरस्कारं, आचार्यप्रथमवर्षस्य मीरा ऐ.जे. साहित्यभाषणे सान्त्वनपुरस्कारं लब्धवन्तः।

**समायोजिता राष्ट्रियसङ्गोष्ठी** – परिसरीयन्यायविभागेन न्यायवैशेषिकयोः प्रमेयविचारः इति विषये २०-२-२०१८तः दिनत्रयव्यापिनी राष्ट्रियसङ्गोष्ठी समायोजिता। पाण्डिचेरिविश्वविद्यालयस्य संस्कृतविभागे आचार्याः डा. के.ई. धरणीधरन्वर्याः सङ्गोष्ठीमिमां समुदघाटयन्। डा. वीरनारायणपाण्डुरङ्गी (संस्कृतविश्वविद्यालयः बेङ्गळूरु), डा. बि.वि. वेङ्कटरमणः (संस्कृतविश्वविद्यालयः बेङ्गळूरु), डा. पि.वि. शठकोपताताचार्यः (श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः कालटि) डा. वि वासुदेवन् (श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः कालटि) डा. वि.रामकृष्णभट्टः (संकायप्रमुखचरः श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, कालटि) इत्येते प्रमुखाः वक्तारः आसन्। उत्तराखण्डसंस्कृत-विश्वविद्यालयस्य कुलपतयः आचार्याः पीयूषकान्तदीक्षितवर्याः संपन्नतासमारोहे मुख्यातिथयः अभवन्। उद्घाटनसमापनसत्रयोः आध्यक्ष्यं परिसरप्राचार्याः आचार्याः च.ल.ना शर्मवर्याः निरवहन्।

**विशिष्टव्याख्यानमालाः** – २२-०२-२०१८तमे दिने उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्याः पीयूषकान्त-दीक्षितवर्याः न्यायशाश्त्रस्य महत्वम् इति विषये विशिष्टव्याख्यानं व्यदधुः परिसरप्राचार्याः आचार्याः च.ल.ना शर्मवर्याः आध्यक्ष्यं निरवहन्। २३-०२-२०१८तमे दिने पि.टि. कुर्याकोस् स्मारकप्रभाषणं डा. इ.एन्. इळयद् महाशयैः (संस्कृतविभागाद्यक्षचराः कालिकट्विश्वविद्यालयः) निर्व्यूढम्। परिसरीयज्योतिषविभागस्याभिमुख्ये प्रो. श्रीपादभट्टवर्यैः (राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः) अधिमासः इत्यस्मिन् विषये विशिष्टव्याख्यानं व्यधायि। २१-०३-२०१८ तमे दिने मैसूरनगरस्थ-प्राच्यशोधसंस्थायाः निदेशकचराः आचार्याः नागराजरावुवर्याः ध्वन्यालोकव्यक्तिविवेकयोः ध्वनिसङ्कल्पः इत्यस्मिन् विषये विशिष्टव्याख्यानमकुर्वन्। २१-०३-२०१८ तः २३-०३-२०१८ पर्यन्तं साहित्यविभागेन स्वातन्त्र्योत्तरसंस्कृतकाव्यानि काव्यशास्त्रग्रन्थाश्च इति विषये समायोजितायाः राष्ट्रियसङ्गोष्ठ्याः समुद्घाटनमपि आचार्यैः नागराजरावुवर्यैः निर्व्यूढम्। उभयत्रापि आध्यक्ष्यं परिसरप्राचार्याः आचार्याः च.ल.ना शर्मवर्याः निरवहन्।

**व्याकरणविभागीया राष्ट्रियसङ्गोष्ठी व्याख्यानमाला च** – व्याकरणविभागेन समायोजिते विशिष्टव्याख्यानकार्यक्रमे २५-०३-२०१८ दिने डा. बि.वि. वेङ्कटरमणमहाभागैः (सहाचार्यः, बेङ्गळूरुसंस्कृतविश्वविद्यालयः) नञर्थविचारः इति विषये व्याख्यानमकारि। व्याकरणविभागेन समायोजितायाः दिनत्रयव्यापिन्याः विभक्त्यर्थविचाराख्यायाः राष्ट्रियसङ्गोष्ठ्याः उद्घाटनमपि तैः निर्व्यूढम्। सङ्गोष्ठ्याः संपन्नतासमारोहे डा. यमुना महाभागा (श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, कालटि) भागमग्रहीत्।

**वेदान्तविभागीया राष्ट्रियसङ्गोष्ठी व्याख्यानमाला च** – वेदान्तविभागेन उपनिषत्प्रमेयविचारः इत्यस्मिन् विषये द्विदिवसीया राष्ट्रियसङ्गोष्ठी मार्चमासस्य सप्तविंशति-अष्टाविंशतिदिनाङ्कयोः समायोजिता। अस्याः विचारगोष्ठ्याः समुद्घाटनम् आचार्यैः के.एस्. महेश्वरन्वर्यैः अकारि। द्विदिनव्यापिन्याः राष्ट्रियसंगोष्ठ्याः समापनसमारोहे आचार्याः रामकृष्णभट्टवर्याः मुख्यातिथित्वेन समुपस्थिताः आसन्। कार्यक्रमोऽयं परिसरप्राचार्याणां प्रो. च.ल.ना. शर्ममहाभागानाम् आध्यक्ष्ये सम्पन्नः। वेदान्तविभागेन विशिष्टव्याख्यानमालाकार्यक्रमः मार्चमासस्य अष्टाविंशतिदिनाङ्के समायोजितः। तत्र आचार्याः रामकृष्णभट्टवर्याः अद्वैतवेदान्ते जीवेश्वरस्वरूपम् इत्यस्मिन् विषये विशिष्टं व्याख्यानं प्रास्तुवन्। कार्यक्रमस्यास्य अध्यक्षपदम् अलङ्कृतवन्तः परिसरप्राचार्याः प्रो. च.ल.ना. शर्ममहाभागाः।

**शिक्षाशास्त्रविभागीया राष्ट्रियसङ्गोष्ठी व्याख्यानमाला च** – शिक्षाशास्त्रविभागेन २९-०३-२०१८दिने समायोजिते विशिष्टव्याख्यानकार्यक्रमे तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठस्य शिक्षाशास्त्रविभागवरिष्ठाध्यापकाः आचार्याः पि. नागमुनिरेड्डिमहोदयाः मनोविज्ञानज्यौतिषशास्त्रयोः शैक्षिकसंबन्धः इति विषये विशिष्टव्याख्यानमकुर्वन्। तैः शास्त्रशिक्षणं तथा भाषाशिक्षा-नव्यप्रवृत्तयः इति विषये द्विदिवसीयराष्ट्रियसङ्गोष्ठ्याः समुद्घाटनमपि व्यधायि। नाना राज्येभ्यः शिक्षाविदः सङ्गोष्ठ्यां भागं स्वीचक्रुः। उद्घाटनसत्रे समापनसत्रे च परिसरप्राचार्याः आचार्याः च.ल.ना. शर्ममहाभागाः आध्यक्ष्यं निरवहन्।



राष्ट्रियसङ्गोष्ठ्याः उद्घाटनकार्यक्रमे भाषमाणः
प्रो. के.ई. धरणीधरन्वर्यः



राष्ट्रियसङ्गोष्ठ्याः समापनकार्यक्रमे भाषमाणः
कुलपतिः प्रो. पीयूषकान्तदीक्षितवर्यः



सङ्गोष्ठ्यां सम्बोधयन् प्रो. रामकृष्णभट्टवर्यः



प्रो. श्रीपादभट्टवर्यं सम्मानयन् परिसरप्राचार्यः




पी.टी. कुर्याकोसस्मारकव्याख्यानमालायां सभां सम्बोधयन्
डॉ. ई.एन्. इळयद्वर्यः



वेदान्तसङ्गोष्ठ्याः उद्घाटनकार्यक्रमे अतिथिं सम्मानयन्
परिसरप्राचार्यः



व्याकरणसङ्गोष्ठ्यां भाषणं विदधानः
डॉ. बी.वी. वेङ्कटरमणवर्यः



शिक्षाशास्त्रसङ्गोष्ठ्याम् अतिथिं सम्मानयन्
परिसरप्राचार्यः

# राष्ट्रियसंस्कृतसंस्थानम्

(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः,
भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058

## संस्कृतशिक्षायाः विकासयोजनायाः अन्तर्गततया 2018-19 वर्षस्य वित्तीयसहायतार्थम् अधिसूचना

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य तत्त्वावधाने नवदेहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन २००७ तमवर्षीयायाः संस्कृतशिक्षायाः विकासस्य पुनरीक्षितयोजनायाः अन्तर्गततया अधोनिर्दिष्टाभ्यः २०१८-१९ तमवर्षस्य वित्तीयसहायतानुदानं निमित्तीकृत्य निर्धारितप्रपत्रानुगुणम् आवेदनपत्राणि आमन्त्र्यते –

**संस्कृतशिक्षणाय वित्तीयसहायता-**

(क) पारम्परिकसंस्कृतपाठशालासु/महाविद्यालयेषु संस्कृताध्यापकेभ्यः वित्तीयसहायतानुदानम्।

(ख) पारम्परिकसंस्कृतपाठशालासु/महाविद्यालयेषु आधुनिकविषयाध्यापकेभ्यः वित्तीयसहायतानुदानम्।

(ग) राज्यसर्वकारसम्बद्धेषु माध्यमिकविद्यालयेषु/उच्चतरमाध्यमिकविद्यालयेषु संस्कृताध्यापकेभ्यः वित्तीयसहायतानुदानम्।

२. देशे अभावग्रस्तपरिस्थितिषु उषितेभ्यः संस्कृतपण्डितेभ्यः सम्मानराश्यनुदानम्।

३. सर्वकारेतरसङ्घटनेभ्यः/मानितसंस्कृतविश्वविद्यालयेभ्यः/विभिन्नशोधपरियोजनाभिः कार्यक्रमैः सह युक्तेभ्यः विश्वविद्यालयेभ्यः संस्कृतसंवर्धनगतिविधीनां कृते वित्तीयसहायतानुदानम्।

४. संस्कृतस्य दुर्लभपुस्तकानां पुनर्मुद्रणाय, प्रकाशनाय तथा संस्कृतपुस्तकानां नैकप्रतिकृतिक्रयणाय च वित्तीयसहायतानुदानम्।

५. सेवानिवृत्तानां/लब्धख्यातीनां संस्कृतविदुषां (शास्त्रचूडामणीनां) सेवानाम् उपयोगार्थं वित्तीयसहायतानुदानम्।

६. पारम्परिकसंस्कृतपाठशालासु/संस्थासु विद्यमानानां छात्राणां व्यावसायिकप्रशिक्षणकार्यक्रमाणाम् आयोजनार्थं पञ्जीकृतशैक्षिकसङ्घटनादिभ्यः वित्तीयसहायतानुदानम्।

७. संस्कृतशिक्षणस्य मानकानां परिपोषणाय विश्वविद्यालयेभ्यः/मानितविश्वविद्यालयेभ्यः/सी.बी.एस.ई./ एन्.सी.ई.आर्.टी./एस्.सी.ई.आर्.टी. प्रभृतिभ्यः वित्तीयसहायतानुदानम्।

**सूचना –** प्रत्येकं योजनायाः कृते आवेदितानि असम्पूर्णानि आवेदनपत्राणि तथा निर्धारिततिथेः पश्चात् प्राप्तानि आवेदनपत्राणि नैव स्वीक्रियन्ते। उपर्युक्तानां सर्वासां योजनानाम् (क्रमशः १ तः ७) आवेदनपत्राणि, नियमाः, सूचनाः इत्यादीनां सम्पूर्णं विवरणं संस्थानस्य वेब सङ्केतात् www.sanskrit.nic.in प्राप्तुं शक्नुवन्ति।

–कुलसचिवः (प्र.)

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.XI Issue No.38-39 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007